विस्तृत्य गरुडः पक्षौ हरन्निव महोरगं ।
विहरिष्यामि वेगेन आकाशं विहगालयं ॥ ६० ॥
इहैव मां प्रतीक्षध्वं सर्वे वानरपुङ्गवाः ।
अहमेतद्गमिष्यामि योजनानां शतं द्रुतं ॥ ६१ ॥
आदित्यचन्द्रचरिते ग्रहनक्षत्रसेविते ।
वैनतेयस्य वा शक्तिर्मम वा मारुतस्य वा ॥ ६२ ॥
ऋते सुपर्णराजाच्च मारुताच्च महाजवात् ।
न तद्भूतं प्रपश्यामि यो मां द्रुतमनुव्रजेत् ॥ ६३ ॥
निमेषान्तरमात्रेण निरालम्बनमम्बरं ।
सहसा निपतिष्यामि घनाद्विद्युदिवाम्बरे ॥ ६४ ॥
भविष्यति च मे रूपं प्लवमानस्य सागरं ।
विष्णोर्विक्रममाणस्य यथा देवासुरे पुरा ॥ ६५ ॥
बुद्ध्या यथा च पश्यामि शंसतीव मनश्च मे ।
अहं द्रक्ष्यामि वैदेहीं प्रमोदध्वं प्लवङ्गमाः ॥ ६६ ॥
मारुतस्य समो वेगे वैनतेयसमो बले ।
अयुतं योजनानां हि गच्छेयमविचारयन् ॥ ६७ ॥
वासवस्य सवज्रस्य ब्रह्मणो वा स्वयम्भुवः ।
विक्रम्य सहसा हस्तादानयेयं सुधामहं ॥ ६८ ॥
चन्द्रादपि तथा कान्तिं सूर्यादपि तथा प्रभां ।
लङ्कामपि समुत्क्षिप्य सीतां तामहमानये ॥ ६९ ॥

तमेवं वानरश्रेष्ठं गर्जन्तं मरुतः सुतं ।
प्रत्युवाच शुभं वाक्यमङ्गदोऽथ विशारदः ॥ ७० ॥
वीर केशरिणः पुत्र वीर्यवान् मारुतात्मज ।
ज्ञातीनां सुमहाशोकस्त्वया प्लवग नाशितः ॥ ७१ ॥
तव कल्याणरुचयः कपिमुख्याः समागताः ।
मङ्गलान्यथ सिद्ध्यर्थं करिष्यन्ति प्लवङ्गमाः ॥ ७२ ॥
ब्रह्मर्षीणां प्रसादेन कपिवृद्धमतेन च ।
गुरूणां च प्रसादेन प्रक्रम त्वं महार्णवं ॥ ७३ ॥
स्थास्यामश्चैकपादेन यावदागमनं तव ।
त्वद्गतानि हि जीवानि सर्वेषां नः प्लवङ्गम ॥ ७४ ॥
एवमुक्तः परिषदा सोऽङ्गदेन च वानरः ।
अभिवाद्याभिवाद्यांश्च व्यजृम्भत महाकपिः ॥ ७५ ॥
वीक्षां चक्रे च संहृष्टः समन्ताद्वानरर्षभान् ।
उत्पत्य च हरिस्तूर्णमुवाच हरियूथपान् ॥ ७६ ॥
क्रामन्तं वर्द्धमानं च धरणी मां न धारयेत् ।
प्लवतो हि ममाधारं न करिष्यति मेदिनी ॥ ७७ ॥
उच्छ्रितं शैलशिखरं विशालं सुदृढं महत् ।
ज्ञायतां तत्र गच्छामो यन्मे वेगं सहिष्यति ॥ ७८ ॥
पार्श्वे हि मलयस्यायं रम्यः प्रस्रवणो गिरिः ।
आरुह्यैनं क्रमिष्यामि सागरं सरितां पतिं ॥ ७९ ॥

IV.

एवं तस्य ब्रुवाणस्य सर्वे ते वानरर्षभाः ।
चक्रुः प्रणामं मुदिताः शक्रस्येव मरुद्गणाः ॥ १ ॥
तस्य पुष्पवतीं चित्रां वनमालां महात्मनः ।
चक्रुस्ते वानरश्रेष्ठाश्चन्दनैरङ्गदादयः ॥ २ ॥
स तैः परिवृतः श्रीमान् वानरैर्वानरर्षभः ।
आरुरोह गिरिश्रेष्ठं महेन्द्रमरिमर्दनः ॥ ३ ॥
वृतं नानाविधैर्वृक्षैर्मृगसेवितशाद्वलं ।
लतावितानसंछन्नं नित्यपुष्पफलद्रुमं ॥ ४ ॥
मत्तद्विजगणोद्घुष्टं सलिलोत्पीडसंकुलं ।
सिंहशार्दूलचरितं मत्तमातङ्गसेवितं ॥ ५ ॥
महद्भिरुच्छ्रितैः शृङ्गैरुल्लिखन्तमिवाम्बरं ।
सर्वसत्त्वालयं श्रीमत्सानुमन्तं समन्ततः ॥ ६ ॥
स तस्य शिखरे श्रीमान् महेन्द्रस्य महाकपिः ।
विरराज महातेजा द्वितीय इव पर्वतः ॥ ७ ॥
स पद्भ्यां पीडितस्तेन कपिना पर्वतोत्तमः ।
ररास सिंहाभिहतो महामत्त इव द्विपः ॥ ८ ॥
मुमोच सलिलोत्पीडं विशीर्णशिखरोच्छ्रयः ।
वित्रस्तकपिमातङ्गः प्रकम्पितमहाद्रुमः ॥ ९ ॥

शिलान्तरगताः सर्पाः पीड्यमाना महाविषाः ।
सधूमज्वलितं घोरं मुमुचुर्ज्वलनं मुखैः ॥१०॥
नागगन्धर्वमिथुनैर्मानसंसर्गकर्कशैः ।
उत्पतद्भिर्विहङ्गैश्च विद्याधरगणैरपि ॥११॥
त्यज्यमानमहासानुः संप्रलीनमहोरगः ।
पृथुशृङ्गशिलोद्घातस्तदाभूत् स महागिरिः ॥१२॥
ऋषिभिस्त्राससंभ्रान्तैस्त्यज्यमानः स लक्ष्यते ।
सीदन् महति कान्तारे नाथहीन इवाध्वगः ॥१३॥

इत्यार्षे रामायणे सुन्दरकाण्डे समुद्रलङ्घनव्यवसायो
नाम तृतीयः सर्गः—महेन्द्रारोहणं
नाम चतुर्थः सर्गः ॥

V.

ततो रावणनीतायाः सीतायाः शत्रुकर्षणः ।
इयेष पदमन्वेष्टुं चारणाभ्यर्चिते पथि ॥ १ ॥
स ददर्श महाघोरं सागरं वरुणालयं ।
अपारमिव गर्जन्तं महोरगनिषेवितं ॥ २ ॥
स तिष्ठन् पर्वतस्याग्रे प्रबभौ हरिपुङ्गवः ।
लोकानिव पुरा विष्णुः क्रमिष्यन् विक्रमैस्त्रिभिः ॥ ३ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
ज्ञातकौतूहलास्तत्र द्रष्टुकामास्तदद्भुतं ॥ ४ ॥
पार्थिवानि च भूतानि सागरान्तर्गतानि च ।
शैलद्रुमनिवासीनि तस्थुस्तत्र समन्ततः ॥ ५ ॥
प्रणम्य तु महाबाहुर्देवताभ्यः समाहितः ।
चन्द्रसूर्यमहेन्द्रेभ्यः पवनाय स्वयम्भुवे ॥ ६ ॥
महेश्वराय स्कन्दाय यमाय वरुणाय च ।
रामलक्ष्मणसीताभ्यः सुग्रीवाय महात्मने ॥ ७ ॥
ऋषिभ्यश्च पितृभ्यश्च यक्षेन्द्राय च धीमते ।
भूतेभ्यश्चाञ्जलिं कृत्वा प्लवनाय महोदधेः ॥ ८ ॥
ज्ञातींश्च संपरिष्वज्य कृत्वा चाभिप्रदक्षिणं ।
अरिष्टं मार्गमातिष्ठत् पुण्यं वायुनिषेवितं ॥ ९ ॥

पुनरागमनायेति वानरैरभिपूजितः ।
प्रगृह्य स महाबाहून् लङ्काभिमुखसंस्थितः ॥ १० ॥
समाक्रामत् स तं शैलं स चचाल महागिरिः ।
गिरेराक्रम्यमाणस्य तरवस्तरुणाङ्कुराः ॥ ११ ॥
मुमुचुश्चन्दनरसं रक्तमुत्पलगन्धयः ।
गैरिकाञ्जनसंश्लिष्टा हरितालसमावृताः ॥ १२ ॥
व्यशीर्यन्त गिरेस्तस्य शिलाश्च समनःशिलाः ।
शैलान्तरगताः सर्पाः पीड्यमाना महाविषाः ॥ १३ ॥
सधूमं ज्वलनं घोरं ससृजुस्ते महाबलाः ।
समाक्रान्तो बलवता वानरेण महागिरिः ॥ १४ ॥
मुमोच पाण्डरा धाराः सलिलस्य समन्ततः ।
सिद्धचारणजुष्टानि किन्नरैश्चरितानि च ॥ १५ ॥
गिरेराक्रम्यमाणस्य शिखराणि चकम्पिरे ।
तद्रूणां पुष्पिताग्राणां सर्वपुष्पमशीर्यत ॥ १६ ॥
तेन पादपमुक्तेन कुसुमेन सुगन्धिना ।
सर्वतः संवृतः शैलो बभौ पुष्पमयो यथा ॥ १७ ॥
पद्भ्यां दृढमवस्थानं स कृत्वा कपिकुञ्जरः ।
विकुञ्च्य कर्णौ हनुमानुत्पपात महाबलः ॥ १८ ॥
तदूरुवेगोन्मथिताः शालस्यन्दनचन्दनाः ।
उत्पतन्तं समुत्पेतुर्हनुमन्तं सुपुष्पिताः ॥ १९ ॥

समुन्मथितवेगास्ते नगेन्द्रवनरोहिणः ।
सस्कन्धविटपा भग्नाः समुत्पेतुः समन्ततः ॥ २० ॥
तस्य वेगोद्धुतैः पुष्पैः शरीरं शुशुभे चितं ।
ताराभिरतिताम्राभिरुदिताभिरिवाम्बरं ॥ २१ ॥
तस्याम्बरगतौ बाहू शुशुभाते प्रसारितौ ।
अमलाविव निस्त्रिंशौ निर्मुक्तौ भुजगाविव ॥ २२ ॥
मुखे पिङ्गाक्षमुख्यस्य महती परिमण्डले ।
चक्षुषी संप्रकाशेते शनैश्चरबुधाविव ॥ २३ ॥
तस्य वानरसिंहस्य क्रममाणस्य सागरं ।
कक्षान्तरगतो वायुर्जीमूत इव गर्जति ॥ २४ ॥
लाङ्गूलं च समाविद्धं प्रभावात् तस्य शोभते ।
अम्बरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितः ॥ २५ ॥
स्फिग्देशेनातिताम्रेण रराज स महाकपिः ।
महता दारितेनेव गिरिर्गैरिकधातुना ॥ २६ ॥
पतत्पतगसंपाते व्यायतं शुशुभे कपिः ।
प्रवृद्ध इव मातङ्गः कक्षया बध्यमानया ॥ २७ ॥
यं यं देशं समुद्रस्य स जगाम महाकपिः ।
स स तस्याङ्गवातेन सोन्माद इव लक्ष्यते ॥ २८ ॥
प्लवमानं समीक्ष्याथ भुजगाः सागरालयाः ।
व्योम्नि तं कपिशार्दूलं सुपर्णमिव मेनिरे ॥ २९ ॥

दशयोजनविस्तीर्णा दृष्ट्वा त्रिगुणमायतां ।
छायां वानरराजस्य जलजा विस्मयं गताः ॥३०॥
श्वेताभ्रे मेघराजीव वायुपुत्रानुगामिनी ।
तस्य सा शुशुभे छाया प्रवृद्धा लवणाम्भसि ।
खे पुरा वैनतेयस्य हरिष्यत इवामृतं ॥३१॥

इत्यार्षे रामायणे सुन्दरकाण्डे हनुमत्प्लवनं
नाम पञ्चमः सर्गः ॥

VI.

स सागरमनाधृष्यं मध्येन वरुणालयं ।
जगामाकाशमाविश्य वेगेन गरुडो यथा ॥ १ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
अब्रुवन् सूर्यसंकाशां सुरसां नागमातरं ॥ २ ॥
अयं वायुसुतः श्रीमाँल्लङ्घयिष्यति सागरं ।
हनूमान् नाम तस्य त्वं मुहूर्त्तं विघ्नमाचर ॥ ३ ॥
राक्षसीरूपमास्थाय सुघोरा पर्वतोपमा ।
दंष्ट्राकरालपिङ्गाक्षं वक्त्रं कृत्वा नभःस्पृशं ॥ ४ ॥
बलं विज्ञातुमिच्छामः सत्त्वं चास्य महात्मनः ।
कं करिष्यत्युपायं वा विषादं वा गमिष्यति ॥ ५ ॥
एवमुक्ता तु सा देवी दैवतैरभिसत्कृता ।
समुद्रमध्ये तरसाधारयद्राक्षसीं तनुं ॥ ६ ॥
विकृतं च विरूपं च कृत्वा रूपं भयावहं ।
प्लवमानं हनूमन्तं समावृत्येदमब्रवीत् ॥ ७ ॥
मम भक्ष्यः प्रदिष्टस्त्वं सेन्द्रैः सुरगणैः कपे ।
छायां गृह्णामि भूतानां प्रविशेदं ममाननं ॥ ८ ॥
एवमुक्तः सुरसया प्राञ्जलिर्वानरर्षभः ।
विषण्णवदनः श्रीमानिदं वचनमब्रवीत् ॥ ९ ॥
रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकं वनं ।

लक्ष्मणेन सह भ्रात्रा पत्न्या च सह सीतया ॥ १० ॥
जनस्थाननिमित्तं च बद्धवैरस्य राक्षसैः ।
जहार भार्यां वैदेहीं रावणो राक्षसाधिपः ॥ ११ ॥
तस्याः सकाशं यास्यामि दूतोऽहं रामशासनात् ।
कर्तुमर्हसि रामस्य साह्यं विषयवासिनि ॥ १२ ॥
अहं तु मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणं ।
आगमिष्यामि ते वक्त्रं सत्यमेतद्ब्रवीम्यहं ॥ १३ ॥
एवमुक्ता हनूमता सुरसा कामरूपिणी ।
अब्रवीन्नातिवर्तेत्त कश्चिदेतन्मुखं मम ॥ १४ ॥
एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ।
अब्रवीत् कुरु तद्वक्त्रं येन मां भक्षयिष्यसि ॥ १५ ॥
इत्युक्त्वा सुरसां क्रुद्धस्त्रिंशद्योजनमायतः ।
दशयोजनविस्तारो बभूव पवनात्मजः ॥ १६ ॥
तद्दृष्ट्वा सुमहद्रूपं राक्षसी घोरदर्शना ।
चकार सुरसा वक्त्रं दशयोजनमायतं ॥ १७ ॥
तां दृष्ट्वा दशविस्तारां सोऽभूद्विंशतियोजनः ।
दृष्ट्वा विंशतिविस्तारं सा त्रिंशद्योजनाभवत् ॥ १८ ॥
त्रिंशद्योजनिकां दृष्ट्वा चत्वारिंशद्गतो ह्यसौ ।
चत्वारिंशद्गतं दृष्ट्वा सा तु पञ्चाशतं गता ॥ १९ ॥
स तां पञ्चाशतं दृष्ट्वा षष्टियोजनिकोऽभवत् ।

षष्टियोजनिकं दृष्ट्वा साभूत् सप्ततियोजना ॥ २० ॥
सप्तत्यां राक्षसीं दृष्ट्वा अशीत्येवं गतो ह्यसौ ।
अशीतिकं च तं दृष्ट्वा साभून्नवतियोजना ॥ २१ ॥
नवत्यां राक्षसीं दृष्ट्वा सोऽभवच्छतयोजनः ।
शतयोजनविस्तारं तं दृष्ट्वा राक्षसी ततः ॥ २२ ॥
चकार सुरसा वक्त्रं शतयोजनमायतं ।
अलं खेदेन महता प्रविशस्वोदरं मम ॥ २३ ॥
दीप्तजिह्वं सुरसाया विलोक्य निरयोपमं ।
स संक्षिप्यात्मनः कायं जीमूत इव मारुतिः ॥ २४ ॥
तस्मिन् मुहूर्त्ते हनूमान् बभूवाङ्गुष्ठमात्रकः ।
सोऽभिपत्य महावक्त्रे निष्पत्य च महाजवः ॥ २५ ॥
अन्तरीक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ।
दाक्षायणि प्रविष्टोऽहं तव वक्त्रं नमोऽस्तु ते ॥ २६ ॥
गच्छामि यत्र वैदेही सत्यं वचनमस्तु ते ।
तं दृष्ट्वा वदनान्मुक्तं चन्द्रं राहुमुखादिव ॥ २७ ॥
अब्रवीत् सुरसा देवी स्वेन रूपेण वानरं ।
अर्थसिद्धौ हरिश्रेष्ठ गच्छ सौम्य यथासुखं ॥ २८ ॥
समागमय वैदेह्या रामं दशरथात्मजं ।
अद्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करं ।
साधु साध्विति भूतानि शशंसुर्मारुतात्मजं ॥ २९ ॥

VII.

तस्मिन् प्लवगशार्दूले प्लवमाने हनूमति ।
इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः ॥ १ ॥
साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः ।
करोमि क्रममाणस्य लोके वाच्यो भवाम्यहं ॥ २ ॥
अहमिक्ष्वाकुनाथेन सगरेण विवर्धितः ।
इक्ष्वाकुसचिवश्चायं नावमन्तुमिहार्हति ॥ ३ ॥
तथा मया विधातव्यं विश्राम्यति यथा कपिः ।
शेषं हि मयि विश्रान्तः सुखेनाभिपतिष्यति ॥ ४ ॥
इति कृत्वा मतिं साध्वीं समुद्रस्थितमम्भसि ।
हिरण्यनाभं मैनाकं समुद्रो गिरिमब्रवीत् ॥ ५ ॥
त्वमिहासुरसंघानां पातालतलवासिनां ।
देवराजेन मैनाक परिघः संनिवेशितः ॥ ६ ॥
त्वं चैवाज्ञातवीर्याणां पुनरेवोत्पतिष्यतां ।
पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ॥ ७ ॥
तिर्यगूर्द्ध्वमधश्चैव शक्तिस्ते शैल वर्तितुं ।
तस्मात् त्वां चोदयाम्यस्मादुत्तिष्ठ नगसत्तम ॥ ८ ॥
य एष कपिशार्दूलो ममोपर्येति वीर्यवान् ।
हनूमान् नाम कार्यार्थी भीमकर्मा खमाप्लुतः ॥ ९ ॥

तस्य सह्यं मया देयमिक्ष्वाकुहितकाम्यया ।
मम चेक्ष्वाकवः पूज्या गिरे पूज्यतरास्तव ॥ १० ॥
कुरु साहाय्यमस्माकं नातः कार्यं त्वयान्यथा ।
कर्तव्यं सुहृदां कार्यं त्वयाद्य वचनान्मम ॥ ११ ॥
सलिलादूर्द्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि ।
अस्माकमतिथिर्ह्येष पूज्यश्च प्लवतां वरः ॥ १२ ॥
चामीकरमहानाभ नागगन्धर्वसेवित ।
हनुमान् त्वयि विश्रान्तो मम शेषं क्रमिष्यति ॥ १३ ॥
काकुत्स्थस्यानृशंसस्य मैथिल्याश्च विवासनं ।
श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥ १४ ॥
हिरण्यनाभस्तद्वचो निशम्य लवणाम्भसः ।
उत्पपात जलात् तूर्णं महाद्रुमलतावृतः ॥ १५ ॥
ततो नीलात् समुद्रस्य सलिलात् प्रज्वलन्निव ।
उत्पपात महातेजाः पर्वतः सूर्यसंनिभः ॥ १६ ॥
स सागरतलं भित्त्वाविदूरादुत्थितस्तथा ।
यथा जलधरं भित्त्वा दीप्तरश्मिर्दिवाकरः ॥ १७ ॥
शातकुम्भमयैः शृङ्गैः सकिन्नरमहोरगैः ।
आदित्योदयसंकाशैरुल्लिखद्भिरिवाम्बरं ॥ १८ ॥
तस्य जाम्बूनदैः शृङ्गैः पर्वतस्य समुच्छ्रितैः ।
आकाशं रत्नसंकाशमभवत् काञ्चनप्रभं ॥ १९ ॥

जातरूपमयैः शृङ्गैः सोऽभवद्गिरिसत्तमः ।
आदित्यवर्णसंकाशो भ्राजमानैः स्वयंप्रभैः ॥ २० ॥
समुत्थितमसङ्गेन हनूमानग्रतः स्थितं ।
मध्ये लवणतोयस्य विघ्नोऽयमिति बुद्धवान् ॥ २१ ॥
तमभ्युत्थितमत्यर्थं महावेगो महाकपिः ।
उरसाच्छादयामास जीमूत इव मारुतिः ॥ २२ ॥
स तथाच्छादितस्तेन कपिना पर्वतोत्तमः ।
बुद्ध्वा तस्य कपेर्वेगं जहर्ष च ननाद च ॥ २३ ॥
स तमाकाशगम्भीरमाकाशस्थमवस्थितं ।
हृष्टः प्रीतियुतं वाक्यमब्रवीत् पर्वतः कपिं ॥ २४ ॥
मानुषं धारयन् रूपमात्मनः शिखरे स्थितः ।
पूर्वकै राघवस्यायमुदधिः संप्रवर्धितः ॥ २५ ॥
स त्वां रामहिते युक्तं प्रत्यर्चयितुमिच्छति ।
कृते हि प्रतिकर्त्तव्यमेष धर्मः सनातनः ॥ २६ ॥
सोऽयं त्वत्प्रियकामार्थी तत् त्वं संवस्तुमर्हसि ।
त्वन्निमित्तमनेनाहं बहुमानात् प्रचोदितः ॥ २७ ॥
उत्तिष्ठ पर्वतश्रेष्ठ विश्रान्तो वै गमिष्यति ।
योजनानां शतं साग्रं कपिरेष समाहितः ॥ २८ ॥
तव सानुषु विश्रम्य शेषं प्रक्रमतामिति ।
दुष्करं कृतवान् कर्म त्वमिदं वानरेश्वर ॥ २९ ॥

निपत्य मम शृङ्गेषु विश्रम्येह यथासुखं ।
तदिदं गन्धवत् स्वादु शुचि मूलफलं बहु ॥३०॥
समास्वाद्य हरिश्रेष्ठ विश्रान्तो वै गमिष्यसि ।
अस्माकमपि संबन्धः कपिमुख्य महांस्त्वयि ॥३१॥
प्रथितस्त्रिषु लोकेषु महागुणपरिग्रहः ।
वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज ॥३२॥
तेषां मुख्यतमं मन्ये त्वामहं पवनात्मज ।
अतिथिः किल पूजार्हः संप्राप्तः प्राकृतो ह्यपि ॥३३॥
धर्मज्ञश्च कपिश्रेष्ठ किं पुनर्यादृशो भवान् ।
त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः ॥३४॥
पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर ।
पूजिते त्वयि पूजार्हे पूजां प्राप्नोति मारुतः ॥३५॥
तस्मात् पूजार्ह एव त्वं शृणु चाप्यत्र कारणं ।
एवमुक्तस्तु हनुमान् सुनाभेन महात्मना ॥३६॥
अन्तरीक्षगतः श्रीमान् मारुतस्यात्मसंभवः ।
स तु दृष्ट्वा महावीर्यं पर्वतं हेमभूषितं ॥३७॥
मणिरत्नाकरं दिव्यं सुनाभमिदमब्रवीत् ।
समुद्रस्याप्रमेयस्य महामकरसंकुले ॥३८॥
किं त्वमन्तर्जले श्रीमान् विगाढो ब्रूहि कारणं ।
एवमुक्तः शुभं वाक्यं सुनाभः पर्वतोत्तमः ॥३९॥

प्रत्युवाच हनूमन्तं वाक्यज्ञो वाक्यकोविदं ।
पक्षवन्तः पुरा शैला बभूवुः शीघ्रगामिनः ॥ ४० ॥
व्रजन्ति स्म दिशः सर्वा गरुडानिलरंहसः ।
ततस्तेषु प्रयातेषु देवसंघाः सहस्रशः ॥ ४१ ॥
भूतानि च भयं जग्मुस्तेषां पतनशङ्कया ।
ततः क्रुद्धः सहस्राक्षः पर्वतानां सहस्रशः ॥ ४२ ॥
पक्षांश्चिच्छेद वज्रेण तत्र तत्र शतक्रतुः ।
स मामुपागतः क्रुद्धो वज्रमुद्यम्य देवराट् ॥ ४३ ॥
ततो ऽहं सहसा क्षिप्तः पवनेन महात्मना ।
अस्मिँल्लवणतोये च विक्षिप्तो वानरर्षभ ॥ ४४ ॥
गुप्तपक्षः समग्रश्च तव पित्राभिरक्षितः ।
तदा गिरीणां सर्वेषां छिद्यमानान् महात्मना ॥ ४५ ॥
पक्षान् दृष्ट्वा महेन्द्रेण प्रविष्टो ऽहं महार्णवं ।
सो ऽहमिन्द्रभयात् तात प्रविष्टो वरुणालयं ॥ ४६ ॥
वसाम्यन्तर्जले घोरे भोगवानिव पन्नगः ।
हिरण्यनाभो नाम्नाहं काञ्चनः पर्वतोत्तमः ॥ ४७ ॥
मा भैषीर्विश्रमात्र त्वं त्वदर्थमहमुत्थितः ।
ततो ऽहं मानयामि त्वां मान्यस्यासि सुतो मम ॥ ४८ ॥
एष मे त्वयि संबन्धः कपिमुख्य महागुणः ।
तस्मिन्नेवं गते कार्ये सागरस्य ममैव च ॥ ४९ ॥

प्रीतिं प्रीतिमतः कर्तुं त्वमर्हसि महाकपे ।
श्रममोक्षाय पाद्यार्घ्यं गृहाण च कपीश्वर ॥ ५० ॥
प्रीतिं च बहुमन्यस्व प्रीतोऽस्मि तव दर्शने ।
इत्युक्तः शैलराजेन हनूमान् मारुतात्मजः ॥ ५१ ॥
अब्रवीत् कृतकृत्योऽस्मि विश्रान्तश्च नगोत्तम ।
प्रीतोऽस्मि कृतमातिथ्यं हार्दिक्यं चापि दर्शितं ॥ ५२ ॥
त्वरया कार्यहेतोर्मे कालश्चैवातिवर्तते ।
हमिष्यता प्रतिज्ञातं मया च ज्ञातिमण्डले ॥ ५३ ॥
अप्राप्ते योजनशते नान्तरास्थेयमित्युत ।
तस्मादिह न तिष्ठामि त्वयि पर्वतसत्तम ॥ ५४ ॥
स्पृशामि त्वाहमङ्गुल्या मानितोऽस्तु भवानिति ।
इत्युक्त्वा पाणिना शैलं संस्पृश्य हरिपुङ्गवः ॥ ५५ ॥
पितुः पन्थानमास्थाय जगाम प्रहसन्निव ।
स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः ॥ ५६ ॥
पूजितश्चोपपन्नाभिराशीर्भिरनिलात्मजः ।
शुशुभे सुमहातेजा महाकायो महाबलः ॥ ५७ ॥
वायुमार्गे निरालम्बे पक्षवानिव पर्वतः ।
सेविते वारिधाराभिः पतगैश्च निषेविते ॥ ५८ ॥
चरिते कौशिकाचार्यैरैरावणनिषेविते ।
सिंहकुञ्जरशार्दूलतुरगोरगवाहनैः ॥ ५९ ॥

विमानैः संपतद्भिश्च विविधैः समलंकृते ।
ग्रहचन्द्रार्कनक्षत्रतारागणनिषेविते ॥ ६० ॥
महर्षिदेवगन्धर्वयक्षराक्षससेविते ।
आयाते पक्षिसंघानां पक्षिराडिव सोऽव्रजत् ॥ ६१ ॥
कृतपुण्यैर्महाभागैः स्वर्गविद्भिरलंकृते ।
वहता हव्यमत्यन्तं सेविते चित्रभानुना ॥ ६२ ॥
पाण्डरारुणवर्णानि नीलमाञ्जिष्ठकानि च ।
कपिना कृष्यमाणानि महाभ्राणि चकाशिरे ॥ ६३ ॥
वज्राशनीनां संपाते वज्राशनिविभूषिते ।
वज्राशनिनिपाताच्च पावकप्रपशोभिते ॥ ६४ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ।
प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ६५ ॥
तत् तु भीमं हनुमतो दृष्ट्वा कर्म सुदुष्करं ।
देवता अभवंस्तुष्टाः सर्वे च परमर्षयः ॥ ६६ ॥
नागगन्धर्वदैतेयास्तत्रस्थास्तेन कर्मणा ।
काञ्चनस्य सुनाभस्य परितुष्टश्च वासवः ॥ ६७ ॥
इदं चोवाच वचनं खस्थस्तं दैवतैः सह ।
सुनाभं पर्वतश्रेष्ठं स्वयमिन्द्रः सुरेश्वरः ॥ ६८ ॥
हिरण्यनाभ शैलेन्द्र परितुष्टोऽस्मि ते भृशं ।
अभयं ते प्रयच्छामि तिष्ठ सौम्य यथासुखं ॥ ६९ ॥

सख्यं कृतं ते सुमहद्विक्रान्तस्य हनूमतः ।
क्रामतो योजनशतं निर्भयस्य भये सति ॥ ७० ॥
रामस्य हि स दौत्येन याति दाशरथेर्हरिः ।
सत्क्रियां कुर्वता शक्त्या तोषितास्ते दृढं वयं ॥ ७१ ॥
ततः प्रहर्षमतुलं लेभे साधुशिलोच्चयः ।
देवतानां प्रभुं दृष्ट्वा परितुष्टं शतक्रतुं ॥ ७२ ॥
स तैर्दत्तवरः शैलो बभूवावस्थितस्तदा ।
देवताः सिद्धगन्धर्वाः साधु साध्वित्यपूजयन् ॥ ७३ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे सुरसावक्त्रप्रवेशो
नाम षष्ठः सर्गः—सुनाभोद्गमो
नाम सप्तमः सर्गः ॥

VIII.

प्लवमाने ततस्तस्मिन् सिंहिका नाम राक्षसी ।
मनसा चिन्तयामास प्रवृद्धा कामरूपिणी ॥ १ ॥
अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता ।
इदं खे सुमहत् सत्त्वं चिरस्य वशमागतं ॥ २ ॥
इति संचिन्त्य मनसा छायां वस्त्रमिवाक्षिपत् ।
छायायां निगृहीतायां चिन्तयामास वानरः ॥ ३ ॥
अहो क्षिप्तोऽस्मि सहसा निर्धूत इव पर्वतः ।
प्रतिलोमेन वातेन महानौरिव सागरे ॥ ४ ॥
तिर्यगूर्द्ध्वमधस्ताच्च वीक्षमाणस्तु मारुतिः ।
स ददर्श महत् सत्त्वमुत्थितं लवणाम्भसः ॥ ५ ॥
कथितं कपिराजेन यत् सत्त्वं मे महोदधौ ।
छायाग्राहि महावीर्यं तदिदं नात्र संशयः ॥ ६ ॥
स तां बुद्ध्वाथ तत्त्वेन सिंहिकां मतिमान् कपिः ।
व्यवर्धत महाकायः प्रावृषीव पयोधरः ॥ ७ ॥
तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः ।
वक्त्रं व्यवृणुतात्यर्थं पातालसदृशं तदा ॥ ८ ॥
स ददर्श ततस्तस्याः सुमहद्विवृतं मुखं ।
कायवन्तां च मेधावी मर्माणि च महाकपिः ॥ ९ ॥

तस्मिन् स विवृते वक्त्रे वज्रसंहननः कपिः ।
संक्षिप्य मुहुरात्मानं प्रविवेश महाबलः ॥ १० ॥
ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः ।
उत्पपाताथ वेगेन मनोमारुतविक्रमः ॥ ११ ॥
दृष्ट्या धार्ष्ट्येन धृत्या च दाक्ष्येण च बलेन च ।
स कपिः परमं वेगं विदधे पुनरात्मवान् ॥ १२ ॥
सा तु तेनातिवेगेन मनोमारुतरंहसा ।
निहता वानरेन्द्रेण निपपात महोदधौ ॥ १३ ॥
स सिंहिकावधं कृत्वा वेगवान् सुसमाहितः ।
लङ्कां प्रतिजगामाशु वेगेन गरुडो यथा ॥ १४ ॥
निहतां वानरेन्द्रेण पतितां वीक्ष्य सिंहिकां ।
भूतान्याकाशचारीणि तमूचुः प्लवगर्षभं ॥ १५ ॥
भीमं कर्म कृतं तात महत् सत्त्वं त्वया हतं ।
यस्या भयात् सुरपतिर्देवाश्च सह चारणैः ॥ १६ ॥
इमं देशं वर्जयन्ति सा त्वया निहता बलात् ।
कृताः क्षेमाश्च पन्थानः सुखं गच्छन्ति खेचराः ॥ १७
अज्ञेया निहता ह्येषा राक्षसी कामरूपिणी ।
साधयार्थमभिप्रेतमरिष्टं व्रज वानर ॥ १८ ॥
एतानि यस्य चत्वारि वानरेन्द्र यथा तव ।
धृतिर्मतिर्बलं धार्ष्ट्यं स कर्मसु न सीदति ॥ १९ ॥

स तैः सभाजितः प्राज्ञः प्रतिपन्नप्रयोजनः ।
जगामाकाशमाविश्य त्वरमाणो महाकपिः ॥ २० ॥
स सागरमनाधृष्यं क्रमित्वा वानरर्षभः ।
योजनानां शतस्यान्ते वनराजीं ददर्श ह ॥ २१ ॥
प्राप्तभूयिष्ठपारश्च सर्वतः स विलोकयन् ।
ददर्श महतीं लङ्कां त्रिकूटशिखरे स्थितां ॥ २२ ॥
संपूर्णां राक्षसैर्घोरैरिन्द्रस्येवामरावतीं ।
स महामेघसंकाशं समीक्ष्यात्मानमात्मना ॥ २३ ॥
निरुन्धन्तमिवाकाशं प्रदध्यावात्मवान् कपिः ।
कायवृद्धिं प्रवेशं च मम दृष्ट्वैव राक्षसाः ॥ २४ ॥
मयि कौतूहलं कुर्युरिति मे निश्चिता मतिः ।
ततः शरीरमत्यर्थं संक्षिप्याथ सुसंवृतः ।
कपिः प्रकृतिमापेदे विष्णुर्विक्रान्तवानिव ॥ २५ ॥

ततः सुवेलस्य गिरेः प्रवृद्धे
विविक्तकूटे भिपपात शृङ्गे ।
सकेतकोद्दालकनारिकेले
महाभ्रकूटप्रतिमे महात्मा ॥ २६ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे सागरलङ्घनं
नाम अष्टमः सर्गः ॥

IX.

ततः स हनुमान् क्रान्तः सागरं मकरालयं ।
निपत्य च परे पारे विश्रम्य च महाबलः ॥ १ ॥
ददर्श तां पुरीं लङ्कां त्रिकूटशिखरे स्थितां ।
सारवान् सागरस्यान्ते निपत्योत्तमविक्रमः ॥ २ ॥
समाश्वस्य कपिस्तत्र न ग्लानिमध्यगच्छत ।
योजनानां सहस्राणि क्रमेयं सुबहून्यपि ॥ ३ ॥
किं पुनः सागरस्यान्तं परिसंख्यातयोजनं ।
इति वीर्यवतां श्रेष्ठो मतिं कृत्वानिलात्मजः ॥ ४ ॥
प्रातिष्ठत समाश्वस्तो लङ्कां प्रति महाबलः ।
शाद्वलानि च नीलानि विविधानि वनानि च ॥ ५ ॥
गन्धवन्ति च संपश्यन् प्रफुल्लनगवन्ति च ।
शैलांश्च तरुसंछन्नान् वनराजीश्च पुष्पिताः ॥ ६ ॥
शरलान् कर्णिकारांश्च खर्जूरांश्चांश्च पुष्पितान् ।
पियालान् मुचुकुन्दांश्च नीपान् सप्तच्छदांस्तथा ॥ ७ ॥
अशोकान् कोविदारांश्च करवीरांश्च पुष्पितान् ।
पुष्पभारावनद्धांश्च तथा मुकुलितानपि ॥ ८ ॥
पादपान् विहगाकीर्णान् पवनोद्धूतमस्तकान् ।
हंसकारण्डवाकीर्णा वापीः पद्मोत्पलावृताः ॥ ९ ॥

नदीः शुभजलाश्चैव पादपैरुपशोभिताः ।
आक्रीडान् विविधान् रम्यान् विविधांश्च जलाशयान् ।१०।
संवृतान् विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः ।
उद्यानानि च रम्याणि निरीक्ष्य कपिसत्तमः ॥११॥
आससाद स लक्ष्मीवाँल्लङ्कां रावणपालितां ।
शङ्खमौक्तिकसंघातैरवकीर्णेन पर्वसु ॥१२॥
अधिकोद्धृत्ततोयेन वेलालोलमहोर्मिणा ।
नानारत्नाकरवता किन्नरावासदायिना ॥१३॥
नागासुरनिवासेन पवनोद्धूतवीचिना ।
ग्रसतेव नभः कृत्स्नं सागरेणाभिसंवृतां ॥१४॥
वप्रैः श्वेतचयाकारैः परिखाभिश्च सर्वतः ।
अगाधाव्ययतोयाभिरधः परिक्षिप्तामिव ॥१५॥
शातकुम्भेन महता प्राकारेण सुसंवृतां ।
अचिन्त्यां सुकृतप्राप्यां कुवेराध्युषितां पुरा ॥१६॥
अट्टालकशताकीर्णां पताकाध्वजशोभितां ।
स्फाटिकैः काञ्चनैश्चैव शोभितामिन्द्रकोषकैः ॥१७॥
प्राकारतलविन्यस्तैश्चन्द्रसूर्यशतैरिव ।
मसारगल्वर्कमयैः स्तम्भैरुच्छ्रिततोरणां ॥१८॥
स्फाटिकैर्हेमभक्त्यक्तैः कपाटैर्भूषितामिव ।
राक्षसैरभियुक्तैश्च यत्नैः सायुधसंचयैः ॥१९॥

अलंकृतपुरद्वारां समृद्धामिव रूपिणीं ।
विमानैर्हेमनिर्यूहैर्भास्वद्भिर्मणिवेदिकैः ॥ २० ॥
घण्टाध्वजपताकाभिरुन्मीलन्तीमिव श्रियं ।
नानातूर्यनिनादैश्च हयानां हेषितेन च ॥ २१ ॥
बृंहितेन च नागानां रथनेमिस्वनेन च ।
सिंहनादैश्च दृप्तानां राक्षसानां भयावहैः ॥ २२ ॥
सागरस्य च घोषेण हर्षात् प्रहसितामिव ।
गिरिमूर्द्धि स्थितां दिव्यां निर्मितां विश्वकर्मणा ॥ २३ ॥
प्लवमानामिवाकाशे पुरीं देवपुरोपमां ।
उत्तरद्वारमासाद्य तस्याश्च हरिपुङ्गवः ॥ २४ ॥
कैलासशिखरप्रख्यं समुल्लिखदिवाम्बरं ।
लङ्कायां महतीं गुप्तिं सागरं च निरीक्ष्य सः ॥ २५ ॥
रावणं चापि राजानं चिन्तयामास वानरः ।
आगता हरयो ह्यत्र गमिष्यन्ति निरर्थकाः ॥ २६ ॥
नेह युद्धेन वा शक्यं किञ्चिद्व्यवसितेन वा ।
इमां सुविषमां दुर्गां लङ्कां रावणपालितां ॥ २७ ॥
प्राप्य दाशरथी रामः किं करिष्यति वीर्यवान् ।
अवकाशो न सान्त्वस्य राक्षसेष्विह दृश्यते ॥ २८ ॥
न दानस्य न भेदस्य नैव युद्धस्य दृश्यते ।
गतिरत्र चतुर्णां हि वानराणां महात्मनां ॥ २९ ॥

बालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ।
यावज्जानामि वैदेहीं यदि जीवति वा न वा ॥ ३० ॥
तत्रैव चिन्तयिष्यामि तां दृष्ट्वा जनकात्मजां ।
रूपेणानेन तु मया न शक्यं राक्षसीं पुरीं ॥ ३१ ॥
प्रवेष्टुं राक्षसैर्दृप्तैर्गुप्तां बलसमन्वितैः ।
उग्रौजसो महावीर्या बलवन्तश्च राक्षसाः ॥ ३२ ॥
वञ्चनीया मया सर्वे जानकीं परिमार्गता ।
लक्ष्यालक्ष्येण रूपेण रात्रौ लङ्कां पुरीमिमां ॥ ३३ ॥
प्रवेष्टुं प्राप्तकालो मे कृत्यं साधयितुं महत् ।
पुनश्च चिन्तयामास हनुमान् मारुतात्मजः ॥ ३४ ॥
केनोपायेन पश्येयं मैथिलीं जनकात्मजां ।
अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥ ३५ ॥
न विनश्येत् कथं कार्यं रामस्य विदितात्मनः ।
पश्येयं कथमेकान्ते रहितां जनकात्मजां ॥ ३६ ॥
भूता ह्यर्था विनश्यन्ति देशकालविरोधिताः ।
विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३७ ॥
अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते ।
घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥ ३८ ॥
न विनश्येत् कथं कार्यं वैक्लव्यं न कथं भवेत् ।
लङ्घनं च समुद्रस्य कथं तु न वृथा भवेत् ॥ ३९ ॥

मयि दृष्टे हि रक्षोभी रामस्य विदितात्मनः ।
भवेद्व्यर्थमिदं कार्यं रावणानर्थमिच्छतः ॥ ४० ॥
कथं शक्यमिह स्थातुमविज्ञातेन राक्षसैः ।
अपि राक्षसरूपेण न शक्यमटितुं मया ॥ ४१ ॥
वायुरप्यत्र नाज्ञातश्चरेदिति मतिर्मम ।
न ह्यत्राविदितं किञ्चिद्राक्षसानां बलीयसां ॥ ४२ ॥
इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः ।
विनाशं शीघ्रमेष्यामि भर्तुरर्थश्च हास्यते ॥ ४३ ॥
तदनेनैव रूपेण रजन्यां ह्रस्वतां गतः ।
लङ्कामभिपतिष्यामि राघवस्यार्थसिद्धये ॥ ४४ ॥
रावणस्य पुरीं रात्रौ संप्रविश्य दुरासदां ।
भवनानि विचिन्वानो द्रक्ष्यामि जनकात्मजां ॥ ४५ ॥
इति संचिन्त्य हनुमान् सूर्यस्यास्तमनं प्रति ।
रक्षसामन्तरप्रेक्षी तस्थावाश्रित्य काननं ॥ ४६ ॥
वृषदंशप्रमाणस्तु ततो भूत्वा गतेऽहनि ।
निशि लङ्कां महातेजाः प्रवेक्ष्यन् मारुतात्मजः ॥ ४७ ॥
निविष्टां पर्वतस्याग्रे लङ्कामङ्कगतामिव ।
कृत्स्नामालोकयामास प्राकारमभिरुह्य सः ॥ ४८ ॥
सागरोपमनिर्घोषां सागरानिलसेवितां ।
सुगुप्तां राक्षसेन्द्रेण यथेन्द्रेणामरावतीं ॥ ४९ ॥

सुविभक्तमहारथ्यां चत्वरापणशोभितां ।
अनेकयोजनायामामुद्यानवनशोभितां ॥५०॥
सन्नयन्त्रोपकरणां प्रभूतबलवाहनां ।
हृष्टराक्षससंपूर्णां सर्वकामसमृद्धिनीं ॥५१॥
शिलाप्रवालवैदूर्यमुक्ताकाञ्चनराजतैः ।
जाम्बूनदमयैर्द्वारैर्वैदूर्यमणिवेदिकैः ॥५२॥
मणिसोपानसंपन्नैः प्रवालाचितभूमिभिः ।
कैलासशिखराकारैः शारदाम्बुदपाण्डरैः ॥५३॥
भ्राजमानां गृहश्रेष्ठैर्नक्षत्रैर्गगनं यथा ।
वीक्षमाणामिवाकाशमुच्छ्रितैर्भवनोत्तमैः ॥५४॥
धन्विभिर्बलिभिर्वीरैः शूलपट्टिशधारिभिः ।
रक्षितां राक्षसैर्घोरैर्नागैर्भोगवतीमिव ॥५५॥
उत्सिक्तैरवलिप्तैश्च भोगिभिर्बलिभिः सदा ।
संपूर्णां राक्षसैर्भीमैर्गुहामाशीविषैरिव ॥५६॥
साभ्रज्योतिर्गणाकीर्णां विद्युज्ज्वालाभिपीडितां ।
चन्द्रमारुतसंपूर्णां शक्रस्येवामरावतीं ॥५७॥
चारुतोरणनिर्यूहां पाण्डरद्वारगोपुरां ।
महाचक्रमहाशक्तिप्रासप्रहरणायुतां ॥५८॥
किङ्किणीजालवाचालां पताकाभिरलंकृतां ।
क्रौञ्चसारससंघुष्टैर्हंसकारण्डवाकुलैः ॥५९॥

तूर्यभूषणघोषैश्च सर्वतः प्रतिनादितां ।
विस्मयोत्फुल्लनयनः समन्तादवलोकयन् ॥ ६० ॥
वस्वोकसाराप्रतिमां रावणस्य पुरीं शुभां ।
अचिन्त्यामद्भुताकारां हनूमान् मारुतात्मजः ॥ ६१ ॥
आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ।
तां समीक्ष्य पुरीं लङ्कां राक्षसाधिपतेः शुभां ॥ ६२ ॥
अनुत्तमामृद्धिमतीं चिन्तयामास वानरः ।
नेयमन्येन नगरी शक्या धर्षयितुं बलात् ॥ ६३ ॥
रक्षिता रावणबलैरुद्यतायुधपाणिभिः ।
सुग्रीवाङ्गदयोश्चैव सुषेणस्य कपेस्तथा ॥ ६४ ॥
प्रसाध्येयं भवेद्भूमिर्मैन्दद्विविदयोरपि ।
कुमुदस्याथ नीलस्य हरेश्च वृषपर्वणः ॥ ६५ ॥
ऋक्षस्य केतुमालस्य मम चेह गतिर्भवेत् ।
समीक्ष्य तु महाबाहो राघवस्य पराक्रमं ॥ ६६ ॥
लक्ष्मणस्य च विक्रान्तं तेन हृष्याम्यहं पुनः ।
सत्त्वमास्थाय मेधावी ततो मारुतनन्दनः ॥ ६७ ॥
प्रदोषसमये धीमांस्तूर्णमुत्पत्य वेगवान् ।
प्रविवेश पुरीं लङ्कां सुविभक्तमहापथां ॥ ६८ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे हनूमतो
लङ्काप्रवेशो नाम नवमः सर्गः ॥

X.

स रत्नवसनां लङ्कां कोष्ठागारावतंसकां ।
सुन्यस्तां सुसमृद्धार्थां प्रमदामिव रूपिणीं ॥ १ ॥
प्रनष्टतिमिरां दीप्तैर्भास्वरैश्च महागृहैः ।
नगरीं राक्षसेन्द्रस्य प्रविशन् रुरुचे कपिः ॥ २ ॥
जल्पितोत्कृष्टहसितैस्तूर्यघोषपुरः सरैः ।
जजल्पेव तदा लङ्का राक्षसानां च वेश्मसु ॥ ३ ॥
ध्वजाग्रहसितैश्चित्रैः पद्मस्वस्तिकसंस्थितैः ।
वर्धमानविशेषैश्च वर्धमानाजिरैस्तथा ॥ ४ ॥
वज्रवैदूर्यचित्रैश्च हेमजालविभूषितैः ।
गृहमेघैः पुरी भूयः शुशुभे द्यौरिवाम्बुदैः ॥ ५ ॥
स महापथमास्थाय सर्वतः परिलोकयन् ।
मातङ्गमदगन्धाढ्यं चकार मतिमान् मतिं ॥ ६ ॥
अमीषां गृहमुख्यानां नक्षत्रग्रहशोभिनां ।
निवेशमनुपश्यामि खं समुत्पततामिव ॥ ७ ॥
विचित्रनानाभरणांस्ततस्तान् भवनोत्तमान् ।
राघवार्थे कपिः श्रीमान् ददर्श च ननन्द च ॥ ८ ॥
प्रासादमाला विविधाः स्तम्भैः काञ्चनराजतैः ।
शातकुम्भमयैर्जालैर्गन्धर्वनगरोपमैः ॥ ९ ॥

वैदूर्यमणिसंकाशैर्मुक्ताजालतचित्रितैः ।
तलैः स्फाटिकसंकाशैरुपेताः सुमनोहरैः ॥ १० ॥
ददर्श बहुभौमांश्च सप्तभौमांश्च वानरः ।
शुश्राव मधुरं गीतं तन्त्रीतालसमन्वितं ॥ ११ ॥
स्त्रीणां मदसमृद्धानां त्रिदिवेऽप्सरसामिव ।
क्वचिच्च काञ्चीनिनदं नूपुरस्वनसंहितं ॥ १२ ॥
प्रस्वापननिनादांश्च भवनेषु महाकपिः ।
आस्फोटननिनादांश्च बालानां क्ष्वेलतां तथा ॥ १३ ॥
रावणस्तवयुक्तानि रक्षसां जल्पितानि च ।
अथ राजपथे तत्र स्थितं रक्षोबलं महत् ॥ १४ ॥
ददर्श बहुशस्त्राढ्यं रावणस्य वशानुगं ।
दीक्षितान् जटिलान् मुण्डानजिनाम्बरवाससः ॥ १५ ॥
स्वाध्यायनिरतांस्तत्र यातुधानान् सहस्रशः ।
दर्भमुष्टिप्रहरणानग्निकुण्डायुधांस्तथा ॥ १६ ॥
प्रासमुद्गरपाणींश्च दण्डायुधधरानपि ।
अतिस्थूलानतिकृशान् दीर्घान् कुब्जांस्तथापरान् ॥ १७ ॥
स ददर्श महाबाहून् राक्षसान् घोरदर्शनान् ।
एकाक्षानेककर्णांश्च चललम्बस्तनोदरान् ॥ १८ ॥
करालान् भग्नसक्थींश्च विकटान् वामनांस्तथा ।
विरूपान् बहुरूपांश्च सुरूपांस्तिग्मवर्चसः ॥ १९ ॥

विशाले राजमार्गे तु यथायथमवस्थितान् ।
स्रग्विनो लिप्तकायांश्च परमाभरणाम्बरान् ॥ २० ॥
विवृत्तोरुशिरोग्रीवान् विकटानुत्कटानपि ।
शक्तिशूलायुधान् कांश्चित् पट्टिशायुधधारिणः ॥ २१ ॥
धन्विनः खड्गिनश्चापि शतघ्नीमुषलायुधान् ।
परिघोत्तमहस्तांश्च स ददर्श महाकपिः ।
राक्षसान् शतशस्तस्मिन्नारक्षे मध्यमे स्थितान् ॥ २२ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे लङ्काविचयो
नाम दशमः सर्गः ॥

XI.

चन्द्रश्च साचिव्यमिवास्य कुर्वन्
    तारागणैर्मध्यगतो विराजन् ।
ज्योत्स्नावितानेन विचित्य लोकान्
    अभ्युत्थितोऽनेकसहस्ररश्मिः ॥ १ ॥
शङ्खप्रभं क्षीरमृणालगौरम्
    उद्गच्छमाशां निशि भासयन्तं ।
ददर्श चन्द्रं स कपिप्रवीरः
    पोप्लूयमानं सरसीव हंसं ॥ २ ॥
ततः स मध्ये गतमंशुमन्तं
    ज्योत्स्नावितानं महदुद्वहन्तं ।
ददर्श वीरो दिवि भानुमन्तं
    गोष्ठे वृषं मत्तमिव भ्रमन्तं ॥ ३ ॥
लोकस्य पापानि विनाशयन्तं
    महोदधिं चापि समेधयन्तं ।
भूतानि सर्वाणि विराजयन्तं
    ददर्श शीतांशुमथोदयन्तं ॥ ४ ।
यथा हि लक्ष्मीर्भुवि मन्दरस्था
    यथा प्रभातेषु च पुष्करस्था ।

यथैव तोयेषु च सागरस्था
तथा ररार्जेव निशाकरस्था ॥५॥
हंसो यथा राजति पुष्करस्थः
सिंहो यथा राजति कन्दरस्थः
वीरो यथा राजति सङ्गरस्थो
रराज चन्द्रोऽपि तथाम्बरस्थः ॥६॥
सितः ककुद्मानिव तीक्ष्णशृङ्गो
महाबलः श्वेत इवोच्चशृङ्गः।
हस्तीव जाम्बूनदबद्धशृङ्गो
रराज चन्द्रः परिपूर्णशृङ्गः ॥७॥
प्रकाशचन्द्रोदयरम्यदोषः
प्रवृत्तरक्षःपिशिताशिदोषः।
रामाभिरामेरितचित्तदोषः
स्वर्गोपमोऽभूद्भगवान् प्रदोषः ॥८॥
तन्त्रीस्वनाः कर्णसुखाः प्रवृत्ताः
स्वपन्ति नार्यः पतिभिः सुवृत्ताः।
नक्तंचराश्चापि तदा प्रवृत्ता
विहर्तुमत्यद्भुतरौद्रवृत्ताः ॥९॥
मत्तप्रमत्तानां समाकुलानि
रथाश्वभद्रासनसंकुलानि।

वीरश्रिया चापि समाकुलानि
  दृदर्श धीमान् विचरन् कुलानि ॥ १० ॥
परस्परं वाग्भिरुपक्षिपन्ति
  भुजांश्च पीनानभितः क्षिपन्ति ।
धूर्त्तप्रलापानभितः क्षिपन्ति
  मत्ता यथान्योन्यमधिक्षिपन्ति ॥ ११ ॥
रक्षांसि रक्षांसि विनिक्षिपन्ति
  गात्राणि कान्तासु च निक्षिपन्ति ।
ददर्श कान्ताश्च परिस्पृशन्ति
  यथायथं चापि पुनः स्वपन्ति ॥ १२ ॥
महागजैर्जीतमदैर्भ्रमद्भिः
  संपूजितैर्लक्षणतः सुहृद्भिः ।
रराज रक्षोभिरभिश्वसद्भिर्
  क्रुद्धो भुजङ्गैरिव निश्वसद्भिः ॥ १३ ॥
प्रधानबुद्धीन् रुचिरप्रधानान्
  सच्छ्रद्दधानांस्तपसो निधानान् ।
नानाविधान् ब्रह्मसमादधानान्
  ददर्श तस्यां पुरि यातुधानान् ॥ १४ ॥
निनिन्द दृष्ट्वा तु स तान् विरूपान्
  ननन्द कांश्चिच्च पुनःसुरूपान् ।

नानागुणानात्मकुलानुरूपान्
निष्ठावतो न्यायवतोऽनुरूपान् ॥ १५ ॥
ततो वरार्हाः सुविशुद्धभावास्
तेषां स्त्रियस्तत्र महानुभावाः ।
प्रियस्य भावेषु च सक्तभावा
ददर्श तारा इव सुप्रभावाः ॥ १६ ॥
श्रिया ज्वलन्तीर्दयितोपगूढा
ददर्श काश्चित् प्रमदा नवोढाः ।
लतास्तमालस्य नवप्ररूढा
यथा विरूढैः कुसुमोपगूढाः ॥ १७ ॥
अन्याः पुनर्हर्म्यतलोपविष्टाः
काश्चित् प्रियाङ्केषु सुखोपविष्टाः ।
भर्तृप्रिया धर्मपथे निविष्टा
ददर्श काश्चिन्मदनाभिविष्टाः ॥ १८ ॥
अपाश्रितान् काञ्चनराशिवर्णान्
तथा परार्ध्यास्तरणीयपूर्णान् ।
अपाश्रयान् काञ्चनचित्रवर्णान्
ददर्श वीरो रुचिराङ्गवर्णान् ॥ १९ ॥
एवं स्त्रियो वै क्रमशोऽभिरामाः
सुप्रीतियुक्ताः सुमनोऽभिरामाः ।

गृहे गृहे ताः स हरिप्रवीरः
परिभ्रमंस्तत्र ददर्श रामाः ॥ २० ॥
न त्वेव सीतां परमाभिजातां
पथि स्थितां राजकुलप्रजातां ।
लतां प्रफुल्लामिव साधुजातां
ददर्श तन्वीमचिरप्रजातां ॥ २१ ॥
सनातने वर्त्मनि संनिविष्टां
रामेक्षिणीं तां मदनाभिविष्टां ।
भर्तुर्मनश्चापि तथा प्रविष्टां
स्त्रीभ्यो वराभ्यश्च सतीं विशिष्टां ॥ २२ ॥
शोकान्वितामश्रुचितोष्ठकण्ठीं
वरां वराङ्गीं वरनिष्ककण्ठीं ।
अजातपक्षामभिजातकण्ठीं
वने प्रवृत्तामिव नीलकण्ठीं ॥ २३ ॥
अव्यक्तरूपामिव चन्द्ररेखां
पांशुप्रदिग्धामिव हेमरेखां ।
क्षतप्ररूढामिव बाणरेखां
वायुप्रभिन्नामिव धूमरेखां ॥ २४ ॥
स तामपश्यन् मनुजेश्वरस्य
रामस्य भार्यां जयतां वरस्य ।

बभूव दुःखाभिहतश्चिरस्य
लेभे प्रसादं त्वथ बुद्धिरस्य ॥२५॥
प्रविश्य जाम्बूनदजालकान्तं
मणिप्रवेकामलजालकान्तं ।
परार्घरत्नाकरमृद्धिमन्तं
दशाननान्तर्नगरं विभान्तं ॥२६॥

इत्यार्षे रामायणे सुन्दरकाण्डे प्रदोषवर्णना
नाम एकादशः सर्गः ॥

XII.

स संक्षिप्यात्मनः कायं प्रविष्टोऽनुपलक्षितः ।
रावणस्य पुरे गुप्तां मार्गिष्यन् जनकात्मजां ॥ १ ॥
चिन्तयामास हनुमान् राघवप्रियकाम्यया ।
कपिप्रवीरो मनसा मुहूर्त्तं ध्यानमास्थितः ॥ २ ॥
कीदृशे बन्धने बद्धा मुक्ता वा स्वैरचारिणी ।
कश्च रक्षति वैदेहीं कथंरूपा च सा भवेत् ॥ ३ ॥
अदृष्टपूर्वा हि मया वैदेही जनकात्मजा ।
इङ्गितैरनुमानैश्च मया ज्ञेया भविष्यति ॥ ४ ॥
एतां बुद्धिं तदा कृत्वा हनुमान् मारुतात्मजः ।
अन्विवेष तदा सीतां रावणस्य पुरे शुभे ॥ ५ ॥
गृहं स राक्षसेन्द्राणामुद्यानानि च वानरः ।
वीक्षमाणो व्यचरत प्रासादांश्चैव सर्वशः ॥ ६ ॥
स पुप्लुवे महावेगः प्रहस्तस्य निवेशनं ।
ततोऽन्यत् पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ ७ ॥
गत्वा मेघप्रतीकाशं कुम्भकर्णनिवेशनं ।
विभीषणगृहं रम्यं प्रविवेश महाकपिः ॥ ८ ॥
महोदरस्य च गृहं महाकायस्य चैव हि ।
विद्युज्जिह्वस्य च तथा पुप्लुवे कपिकुञ्जरः ॥ ९ ॥

शुकस्य च महावेगः सारणस्य तथैव च ।
ततश्चेन्द्रजितो वेश्म जगाम हरियूथपः ॥ १० ॥
उल्काजिह्वस्य च ततो जगाम भवनं कपिः ।
रश्मिक्रीडस्य भवनं सूर्याक्षस्य तथैव हि ॥ ११ ॥
धूम्राक्षस्य च सम्पातेर्भवनं मारुतात्मजः ।
विद्रूपाक्षस्य भीमस्य घसस्य प्रघसस्य च ॥ १२ ॥
शुकनासस्य वक्रस्य कटस्य विकटस्य च ।
रक्षसो लोमकर्षस्य दंष्ट्रालह्रस्वकर्णयोः ॥ १३ ॥
युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य नादिनः ।
विद्युदुल्काग्निजिह्वानां तथा हस्तिमुखस्य च ॥ १४ ॥
करालस्य पिशाचस्य शोणिताक्षस्य रक्षसः ।
क्रममाणः क्रमेणैवं हनूमान् मारुतात्मजः ॥ १५ ॥
तेषु तेषु पतन् वीरो भवनेषु महाकपिः ।
ऋद्धिमत्सु परामृद्धिं हृष्टः पश्यन् मुहुर्मुहुः ॥ १६ ॥
सर्वेषां समतिक्रम्य भवनानि महाकपिः ।
आससाद स लक्ष्मीवान् राक्षसेन्द्रनिवेशनं ॥ १७ ॥
प्राकारेणार्कवर्णेन महता सुसमावृतं ।
पुण्डरीकावतंसाभिः परिखाभिः परिष्कृतं ॥ १८ ॥
स वीक्षमाणो भवनं परिचक्राम वानरः ।
मणिरत्नसुसंपूर्णैस्तोरणैर्हेमनिर्मितैः ॥ १९ ॥

राजतीभिश्च कन्याभिः स्तम्भैर्हेममयैरपि ।
महासत्त्वैर्महामात्रैः शूरैश्च विगतश्रमैः ॥ २० ॥
उपस्थितमसंहार्यैर्हयस्यन्दनयायिभिः ।
सिंहव्याघ्राजिनच्छन्नैर्दान्तकाञ्चनराजतैः ॥ २१ ॥
घोषवद्भिर्विचित्रैश्च सदानुचरितं रथैः ।
स्वाहाकारवषट्कारैर्ब्रह्मघोषैश्च नादितं ॥ २२ ॥
भेरीमृदङ्गाभिरुतं शङ्खघोषनिनादितं ।
नित्यार्हितमहापूजं सदा पर्वसु राक्षसैः ॥ २३ ॥
समुद्रमिव गम्भीरं पर्जन्यमिव सस्वनं ।
बहुरूपैर्विरूपैश्च मेघपर्वतसंनिभैः ॥ २४ ॥
कुठारशूलासिधरैः शक्तितोमरपाणिभिः ।
रक्षितं राक्षसैर्घोरैः सिंहैरिव महावनं ॥ २५ ॥
महाजनसमापूर्णं हंसैः सर इवाकुलं ।
विराजमानं बहुधा गजाश्वरथसंकुलं ॥ २६ ॥
तं त्रिपिष्टपसंकाशमेकस्थं विश्वकर्मणा ।
कृत्स्नस्य जगतः सारं नवनीतमिवोद्धृतं ॥ २७ ॥
सुराणामसुराणां च दूरादपि भयंकरं ।
सिंहशार्दूलसंपूर्णं कैलासस्येव कन्दरं ॥ २८ ॥
रावणस्य गृहं दृष्ट्वा स कपिः शूरसंमतः ।
लङ्काभरणमित्येव तदामन्यत विस्मितः ॥ २९ ॥

शूलतोमरहस्तानां शक्तिमुद्गरधारिणां ।
ददर्श च महागुल्मं निष्पतन्तं ततो गृहात् ॥ ३० ॥
ततः सुविहितान् हृष्टानीशादन्तान् सुविष्ठितान् ।
कुलीनान् रूपसंपन्नान् गजान् परगजारुहान् ॥ ३१ ॥
निष्ठितान् गजशिक्षायामैरावतसमद्युतीन् ।
मेघस्तनितनिर्घोषान् दुर्धर्षानमरैरपि ॥ ३२ ॥
महस्रशो वहिस्तत्र जाम्बूनदविभूषणान् ।
हेमच्छन्नैरधिततांस्तरुणादित्यवर्चसः ॥ ३३ ॥
हस्तांश्च परसैन्यानां गृहे तस्मिन् ददर्श सः ।
रक्तान् पीतान् सितान् नीलान् हरींश्च स महाजवान् ।३४।
ऋष्यकांस्तालजङ्घांश्च शोणान् पाटलरोमकान् ।
मल्लिकाक्षान् विरूपाक्षान् क्रौञ्चपक्षान् मनोजवान् ॥ ३५ ॥
आरट्टांश्च काम्बोजान् वाह्लिकान् शुभलक्षणान् ।
शुकाननांश्च तुरगानपश्यत् कपिसत्तमः ॥ ३६ ॥
विस्मितो राक्षसेन्द्रस्य रावणस्य निवेशने ।
स मन्दरनगप्रख्यं मयूरस्वनसंकुलं ॥ ३७ ॥
ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमं ।
अनन्तरत्नसंपूर्णं निधिजालसमावृतं ॥ ३८ ॥
धीरनिष्ठितकर्मान्तं गृहं भूतपतेरिव ।
नानाविधमहारत्नं पराशीमनभाजनं ॥ ३९ ॥

दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः ।
विविधैर्बहुसाहस्रैः परिपूर्णं समन्ततः ॥ ४० ॥
यथायथं च मुख्याभिर्वरनारीभिरास्थितं ।
अर्चिषा वररत्नानां तेजसा रावणस्य च ॥ ४१ ॥
विराजमानं सततं रश्मिमन्तमिवांशुभिः ः
मद्यासवकृतक्लेदं मणिभाजनसंकुलं ॥ ४२ ॥
मनोरममसंबाधं कुवेरभवनोपमं ।
महार्हास्तरणोपेतैरुपेतं शयनोत्तमैः ॥ ४३ ॥
विसृतागुरुधूपं च श्वेतमाल्यविभूषितं ।
नूपुराणां च घोषेण काञ्चीनां निःस्वनेन च ॥ ४४ ॥
मृदङ्गतालघोषैश्च सर्वतो विप्रणादितं ।
कूटागारशतैर्युक्तं गन्धर्वनगरोपमं ॥ ४५ ॥
स्त्रीवेशैः स्त्रीसमाचारैर्ज्वलिताङ्गपयोधरैः ।
इतश्चेतश्च धावद्भिर्वृतं सख्यैर्मनोरमैः ॥ ४६ ॥
जाम्बूनदमयान्येव भाजनान्यासनानि च ।
भूषणानि च शुभ्राणि ददर्श कपिकुञ्जरः ॥ ४७ ॥
शोभयन्ति च तद्वेश्म भ्रममाणा वरस्त्रियः ।
यथा कैलासशृङ्गाणि शतशः किन्नरीगणाः ॥ ४८ ॥
विनीतजनसंबाधं स्त्रीरत्नशतशोभितं ।
सुव्यूढकक्षं हनुमान् तद्विवेश महद्गृहं ॥ ४९ ॥

XIII.

अथ शुश्राव निनदं मेघानामिव गर्जतां ।
शङ्खदुन्दुभिवाद्यानां तूर्यघोषविमिश्रितं ॥ १ ॥
ततस्तं देशमागम्य शुश्रुवे यत्र निस्वनः ।
ददर्श पुष्पकं नाम विमानं काञ्चनप्रभं ॥ २ ॥
अर्द्धयोजनविस्तारमर्द्धयोजनमायतं ।
काञ्चनस्तम्भसंबाधं मणिकाञ्चनतोरणं ॥ ३ ॥
मुक्ताजालप्रतिच्छन्नं सर्वकामफलद्रुमं ।
नातिशीतं न चात्युष्णं सर्वर्तुसुखदं शुभं ॥ ४ ॥
दिव्यं कामगमं दृष्ट्वा प्रबालाचिततोरणं ।
आरुरोह हरिश्रेष्ठो विमानं पुष्पकं महत् ॥ ५ ॥
तस्यातीव वरिष्ठं च मध्ये विपुलमायतं ।
ददर्श भवनश्रेष्ठं हनूमान् मारुतात्मजः ॥ ६ ॥
हेमजालपरिच्छन्नं रुक्मवैदूर्यतोरणं ।
सुगुप्तं राक्षसेन्द्रस्य बहुप्राकारशोभितं ॥ ७ ॥
ववौ च तत्र सुरभिः पानमाल्यानुलेपनैः ।
दिव्यः संमूर्च्छितो गन्धो रूपवानिव मारुतः ॥ ८ ॥
सुगन्धस्तं महासत्त्वं बन्धुं बन्धुरिवोत्थितः ।
इत एहीत्युवाचैनं तत्र तत्र स वानरं ॥ ९ ॥

ततः संप्रस्थितः शालां ददर्श महतीं शुभां ।
रावणस्य मनःकान्तां कान्तामिव वरस्त्रियं ॥१०॥
मणिसोपानविकटां हेमजालविराजितां ।
स्फाटिकप्रावृततलां दन्तान्तरितरूपकां ॥११॥
मुक्तामणिप्रबालैश्च रौप्यचामीकरैरपि ।
विभूषितैर्मणिस्तम्भैः समन्तादुपशोभितां ॥१२॥
समैर्ऋजुभिरत्युच्चैः सर्वतः समलंकृतैः ।
स्तम्भैर्धृतैस्तथात्युच्चैर्दिवं संप्रस्थितैरिव ॥१३॥
महत्या कुथयास्तीर्णां पृथिवीलक्षणाङ्कया ।
पृथिवीमिव विस्तीर्णां सराष्ट्रगृहमालया ॥१४॥
उपेतां मत्तविहगैर्दिव्यगन्धाधिवासितां ।
परार्ध्यशयनैर्जुष्टां रक्षोऽधिपतिषेवितां ॥१५॥
धूम्रामगुरुधूपेन विमलां हंसपङ्क्तिभिः ।
चित्रां पुष्पोपहारेण कल्माषीमिव सुप्रभां ॥१६॥
मनःप्रह्लादजननीं कर्णस्यापि प्रसादनीं ।
हृच्छोकनाशिनीं दिव्यां श्रियः संजननीमिव ॥१७॥
इन्द्रियाणीन्द्रियार्थैश्च समं पञ्चभिरुत्तमैः ।
तर्पयन्तीमिव मुहुः सदा रावणसेवितां ॥१८॥
राक्षमेन्द्रप्रभावेन श्रिया चातुलया तथा ।
अर्चिर्भिर्भूषणानां च ज्वलन्तीमिव सर्वतः ॥१९॥

स्वर्गोऽयं देवलोकोऽयमियं सिद्धिः परा भवेत् ।
इति संचिन्तयामास बहुधा स विलोकयन् ॥ २० ॥
प्रध्यायत इवापश्यद्दीपांस्तत्र च काञ्चनान् ।
धूर्त्तानिव महाधूर्त्तैर्देवनेन पराजितान् ॥ २१ ॥
कुथांश्चापश्यदासीना नानावर्णाम्बरस्रजः ।
नारीः सहस्रशस्तत्र नानावेशोज्ज्वलत्विषः ॥ २२ ॥
परावृत्तार्द्धरात्रे तु पाननिद्रावशं गतं ।
क्रीडितोपरतं स्त्रैणं प्रसुप्तं बहुधा तदा ॥ २३ ॥
प्रसुप्तविहगं चैव निःशब्दाम्बरभूषणं ।
निःशब्दहंसभ्रमरं बभौ पद्मवनं यथा ॥ २४ ॥
तासां संवृतदंष्ट्राणि मीलिताक्षाणि मारुतिः ।
अपश्यत् पद्मगन्धीनि वदनानि स योषितां ॥ २५ ॥
प्रबुद्धानीव पद्मानि तासां बुद्ध्वा क्षपात्यये ।
तदा तु कुमुदानीव वदनानि विलोक्य सः ॥ २६ ॥
इमानि वक्त्रपद्मानि नियतं प्रियषट्पदाः ।
अम्बुजानीव फुल्लानि प्रार्थयन्ति पुनः पुनः ॥ २७ ॥
इत्यमन्यत स श्रीमान् तान्यालोक्य महाकपिः ।
मेने हि गुणतस्तानि समानि सलिलोद्भवैः ॥ २८ ॥
सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता ।
शरदीव प्रसन्ना द्यौस्ताराभिरुपशोभिता ॥ २९ ॥

ताभिः परिवृतः स्त्रीभिः शुशुभे राक्षसेश्वरः ।
यथा तारापतिः श्रीमांस्ताराभिरुपशोभितः ॥ ३० ॥
याश्च च्यवन्तेऽम्बरात् ताराः काले काले निराकृताः ।
इमास्ताः संगताः कृत्स्ना इति मेने हरिस्तदा ॥ ३१ ॥
ताराणामिव हि व्यक्तं महतीनां शुभार्चिषां ।
प्रभावर्णाः प्रसादश्च विरेजुस्तत्र योषितां ॥ ३२ ॥
व्यावृत्तशिरसस्तत्र प्रकीर्णाम्बरभूषणाः ।
पानव्यायामखिन्नाश्च निद्रापहृतचेतसः ॥ ३३ ॥
व्यामृष्टतिलकाः काश्चित् काश्चिदुद्भ्रान्तनूपुराः ।
पार्श्वागलितहाराश्च काश्चित् परमयोषितः ॥ ३४ ॥
सुप्ताः सवसनाः काश्चित् काश्चिदामुक्तवाससः ।
व्याविद्धरसनोद्दामाः किशोर्य इव चापराः ॥ ३५ ॥
सुकुण्डलधराश्चान्या विच्छिन्नमृदितस्रजः ।
गजेन्द्रमृदिताः फुल्ला लता इव महावने ॥ ३६ ॥
चन्द्रांशुनिकराभाश्च हाराः कासाश्चिदुत्कटाः ।
स्तनमध्ये सुविन्यस्ता विरेजुर्हंसपाण्डराः ॥ ३७ ॥
अपरासां च वैदूर्याः कादम्बा इव पक्षिणः ।
हेमसूत्राणि चान्यासां चक्रवाका इवाबभुः ॥ ३८ ॥
मृदुष्वङ्गेषु कासाश्चिदग्रतः समुपस्थिताः ।
बभूवुर्भूषणानीव शुभा भूषणराजयः ॥ ३९ ॥

अंशुकान्ताश्च कासाञ्चिन्मुखमारुतघट्टिताः ।
उपर्युपरि वक्त्राणि व्याधूयन्ते पुनः पुनः ॥ ४० ॥
वत्रल्गुश्चापि कासाञ्चित् कुण्डलान्यङ्गदानि च ।
मुखमारुतकम्पेन मन्दं मन्देन योषितां ॥ ४१ ॥
काचिदादर्शकि लीना सुप्ता तत्र व्यराजत ।
महानदीप्रकीर्णेव नलिनी प्लवमाश्रिता ॥ ४२ ॥
कक्षागतविपञ्चीका प्रसुप्तेऽन्यासितेक्षणा ।
प्रसुप्ता कामिनी तत्र बालपुत्रेव वत्सला ॥ ४३ ॥
पटहं चारुसर्वाङ्गी समालिङ्गय तथापरा ।
चिरस्य रमणं लब्धा परिष्वज्येव कामिनी ॥ ४४ ॥
मदविन्याससंन्यस्ताः स्वप्नयुक्तास्तथापराः ।
तेषु तेषु च भावेषु प्रसुप्तास्तनुमध्यमाः ॥ ४५ ॥
प्रियङ्गुफलसंकाशैस्तनुमध्याः पयोधरैः ।
मृदङ्गान् परिपीड्यान्याः सुप्ताः कमललोचनाः ॥ ४६ ॥
आलिङ्गयेषु तल्लान् कृत्वा प्रसुप्ताः परमाः स्त्रियः ।
वेणुशय्याप्रवृत्ताश्च प्रसुप्ताः पानखेदिताः ॥ ४७ ॥
भुजपार्श्वान्तरस्थेन मृदङ्गेन कृशोदरी ।
पणवं च समालिङ्गय सुप्ता मदकृतश्रमा ॥ ४८ ॥
डिण्डिमं परिगृह्यान्या तथैवासक्तगोमुखा ।
प्रसुप्ता तरुणं वत्समुपगुह्येव भामिनी ॥ ४९ ॥

कलसं च समालिङ्ग्य प्रसुप्ता भाति भाविनी ।
वसन्तपुष्पग्रथिता मालेव परिवर्जिता ॥५०॥
काचिदाडम्बरं नारी भुजसंयोगपीडितं ।
कृत्वा कमलपत्राक्षी प्रसुप्ता काममोहिता ॥५१॥
कृत्वा पाणी तथान्योन्यं स्तनान्तरमुपाश्रितौ ।
उपगृह्याबलाः सुप्ता निद्राविशपराजिताः ॥५२॥
अन्या कमलपत्राक्षी पूर्णचन्द्रनिभानना ।
वीणामालिङ्ग्य सुश्रोणी प्रसुप्ता मदविह्वला ॥५३॥
पणवेषु मृदङ्गेषु पीठिकासु तथैव च ।
कुथास्तरणमुख्येषु तथा तालीयकेषु च ॥५४॥
क्रीडितेनापराः क्लान्ताः क्लान्ता गीतेन चापराः ।
नृत्येन चापराः क्लान्ताः प्रसुप्तास्तत्र योषितः ॥५५॥
स्वभुजावुपधायान्याः परिहार्योपशोभिताः ।
अंशुकानि च सूक्ष्माणि सुसुपुस्तत्र योषितः ॥५६॥
अन्या वक्षसि चान्यस्यास्तस्याश्चाप्यपराः कुचे ।
ऊरुपार्श्वकटीपृष्ठमन्योन्यं समुपाश्रिताः ॥५७॥
परस्पराश्लेषिताङ्ग्यो मदस्नेहवशानुगाः ।
एकीकृतभुजाः सर्वाः सुसुपुस्तत्र योषितः ॥५८॥
अन्योन्यस्याङ्गसंस्पर्शात् प्रीयमाणाः सुमध्यमाः ।
अन्योन्यभुजसूत्रैस्ताः स्त्रीमाला ग्रथिता यथा ॥५९॥

मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ।
लतानां माधवे मासि फुल्लानां वायुसेविते ॥ ६० ॥
अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयं ।
आसीद्वनमिवोद्भूतं स्त्रीवनं रावणस्य तत् ॥ ६१ ॥
तासां निद्रावशत्वाच्च मूर्च्छितानां मदेन च ।
पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि ॥ ६२ ॥
तासामुच्छ्वासवातेन माल्यं वस्त्रं च गात्रतः ।
नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलं ॥ ६३ ॥
सुचिरेणापि सुव्यक्तं न तासां योषितां तदा ।
विवेकः शक्यते कर्तुं भूषणेन्दीवरस्रजां ॥ ६४ ॥
नृनागासुरदैत्यानां गन्धर्वाणां च योषितः ।
रक्षसां चाभवन् कन्याः स हि तस्य परिग्रहः ॥ ६५ ॥
तासां चन्द्रोपमैर्वक्त्रैः शुभैर्ललितकुण्डलैः ।
व्यराजत विमानं तन्नभस्तारागणैरिव ॥ ६६ ॥
नूपुरैरपविद्धैश्च वलयैश्चापि भास्वरैः ।
हारैश्च हरिणाक्षीणां प्रकीर्णा शुशुभे मही ॥ ६७ ॥

न तत्र काचित् प्रमदा प्रधाना
रूपेण वीर्येण च या न लब्धा ।
न चान्यकामा न तथान्यपूर्वा
हीना च याभूज्जनकात्मजायाः ॥ ६८ ॥

न चाकुलीना न च हीनरूपा
नादक्षिणा नानुपचारयुक्ता ।
भार्याभवत् तस्य न हीनसत्त्वा
न चान्यकामा न च कामहीना ॥ ६९ ॥

बभूव बुद्धिस्तु कपीश्वरस्य
यदीदृशी राघवधर्मपत्नी ।
इमा यथा राक्षसनाथभार्याः
सुजातमस्या इति ज्ञातबुद्धिः ॥ ७० ॥

पुनश्च सोऽचिन्तयदार्त्तरूपो
ध्रुवं विशिष्टा गुणतो हि सीता ।
अथायं यस्याः कृतवान् महात्मा
लङ्केश्वरः कष्टमकार्यमेतत् ॥ ७१ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे रावणभवनदर्शनं
नाम द्वादशः सर्गः—अवरोधदर्शनं
नाम त्रयोदशः सर्गः ॥

XIV.

अथ दिव्योपमं तत्र स्फाटिकं रत्नभूषितं ।
निरीक्षमाणो हनुमान् ददर्श परमासनं ॥ १ ॥
परमास्तरणास्तीर्णमाविकाजिनसंवृतं ।
तस्य चैकतमे देशे नानारत्नविभूषितं ॥ २ ॥
ददर्श पाण्डरं छत्रं ताराधिपतिसंनिभं ।
दामभिर्वरमाल्यानां समन्तादुपशोभितं ॥ ३ ॥
ततो जीमूतसंकाशं प्रतप्तोत्तमकुण्डलं ।
रोहिताक्षं महाबाहुं महारजतवाससं ॥ ४ ॥
लोहितेनानुलिप्ताङ्गं चन्दनेन सुगन्धिना ।
संध्यारक्तमिवाकाशे तोयदं सतडिद्घनं ॥ ५ ॥
वृतमाभरणैर्मुख्यैः सुद्दप्तं कामरूपिणं ।
सवृक्षवनगुल्माढ्यं प्रसुप्तमिव मन्दरं ॥ ६ ॥
क्रीडित्वा विरतं रात्रौ वराभरणभूषितं ।
गन्धैश्च विविधैर्जुष्टं वरधूपोपधूपितं ॥ ७ ॥
वीज्यमानं वरस्त्रीभिर्बालव्यजनपाणिभिः ।
प्रियं नैर्ऋतकन्यानां राक्षसीनां सुखावहं ॥ ८ ॥
पीत्वा मधूनि विरतं तं ददर्श महाकपिः ।
भास्वरे शयने वीरं प्रसुप्तं राक्षसाधिपं ॥ ९ ॥

अङ्गनानां सहस्रेण भूषितेन समन्ततः ।
कृतमालापशीलेन युक्तगीतानुवादिना ॥ १० ॥
देशकालविधिज्ञेन युक्तवाक्याभिधायिना ।
रतोपरमसंसुप्तं राक्षसेन्द्रं महाबलं ॥ ११ ॥
निश्वसन्तं यथा नागं रावणं वानरोत्तमः ।
सहसा परमोद्विग्नः सोपासर्पद्भीस्ततः ॥ १२ ॥
संबभौ राक्षसेन्द्रस्य स्वपतः शयनोत्तमं ।
गन्धहस्तिनि संविष्टे यथा प्रस्रवणो गिरिः ॥ १३ ॥
अथारोहणमासाद्य वेदिकान्तरमाश्रितः ।
सुप्तं राक्षसशार्दूलं वीक्षां चक्रे महाकपिः ॥ १४ ॥
काञ्चनाङ्गदनद्धांश्च ददर्शास्य महात्मनः ।
विक्षिप्तान् राक्षसेन्द्रस्य भुजानिन्द्रध्वजानिव ॥ १५ ॥
ऐरावतविषाणाग्रैरापीडितकृतव्रणान् ।
वज्रोल्लिखितपीनांशान् नानायुधपरिक्षतान् ॥ १६ ॥
उन्नतांशान् समान् पीनान् संहतान् भुजगायतान् ।
विस्तीर्णे शयने शुभ्रे प्रच्छशीर्षानिवोरगान् ॥ १७ ॥
शशलोहितकल्पेन शीतलेन सुगन्धिना ।
चन्दनेन परार्घ्येन स्वनुलिप्तान् सुतेजसः ॥ १८ ॥
बाहूंस्तस्य महाबाहोर्भुजगेन्द्राङ्गसंनिभान् ।
वज्रवैदूर्यगर्भाणि श्रवणान्तेषु चैव हि ॥ १९ ॥

दद‍र्श तापनीयानि कुण्डलान्यङ्गदानि च ।
पत्नीश्च प्रियभार्यस्य तस्य रक्षःपतेस्तदा ॥ २० ॥
शशिप्रकाशवदना वरकुण्डलभूषिताः ।
अम्लानमाल्याभरणाः सोऽपश्यदुपशायिनीः ॥ २१ ॥
नृत्यवादित्रकुशला राक्षसेन्द्रभुजाङ्कगाः ।
वराभरणसंछन्नाः स्त्रियोऽपश्यत् तथापराः ॥ २२ ॥
श्यामावदाताः सुन्यस्ताः काश्चित् कृष्णा वराङ्गनाः ।
काश्चित् काञ्चनवर्णाङ्गाः प्रमदास्तमुपाश्रिताः ॥ २३ ॥
मदिरासवगन्धी च प्रकृत्या सुरभिः शुभः ।
तासां वदननिश्वासः सिषेवे रावणं तदा ॥ २४ ॥
रावणाननसंपर्कात् काश्चिद्रावणयोषितः ।
वदनानि सपत्नीनामुपाजिघ्रन् पुनः पुनः ॥ २५ ॥
रत्यर्थं सक्तमनसो रावणे रावणस्त्रियः ।
बाहुभिः परिरभ्यैनमत्यर्थं निजुगूहिरे ॥ २६ ॥
तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः ।
गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ॥ २७ ॥
स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयं ।
करेणुभिर्महारण्ये परिकीर्णो यथा द्विपः ॥ २८ ॥
तस्य चोपान्तसंन्यस्ते शयानां शयने शुभे ।
ददर्श रूपसंपन्नां सुश्रोणीं स कपिः स्त्रियं ॥ २९ ॥

गौरीं कनकवर्णाभामिष्टामन्तःपुरेश्वरीं ।
तत्र मन्दोदरीं नाम शयानां शयनोत्तमे ॥ ३० ॥
ददर्श जलदे नीले ज्वलन्तीमिव विद्युतं ।
मुक्तामणिसमायुक्तैर्भूषणैस्तप्तकाञ्चनैः ॥ ३१ ॥
भास्वरैर्भासयन्तीं च स्वश्रिया भवनोत्तमं ।
स तां वीक्ष्य महाबाहुर्हनुमान् मारुतात्मजः ॥ ३२ ॥
तर्कयामास सीतेति रूपयौवनसंपदा ।
हर्षेण महताविष्टो ननन्द च सुविस्मितः ॥ ३३ ॥
ततस्तां मारुतिश्चिन्तां व्यवधूय व्यवस्थितः ।
जगाम चिन्तामपरां सीतां प्रति महामतिः ॥ ३४ ॥
न रामेण वियुक्ता सा स्वप्तुमर्हति भाविनी ।
न भोक्तुं नाप्यलंकर्तुं न पानमुपसेवितुं ॥ ३५ ॥
नान्यं नरमुपस्थातुं सुराणामपि वासवं ।
न हि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि ॥ ३६ ॥
कथं सीता महाभागा धर्मज्ञा धर्मचारिणी ।
कामयुक्तेन मनसा ह्युपतिष्ठेत रावणं ॥ ३७ ॥
इति वायुसुतस्तत्र धीमानालोचनापरः ।
इङ्गितैर्लक्षयामास नेयं सीतेति निश्चितं ॥ ३८ ॥
अन्येयमिति निश्चित्य भूयस्तामन्विवेष सः ।
पानभूमौ हरिश्रेष्ठः सीतासंदर्शनोत्सुकः ॥ ३९ ॥

सर्वकामरसोपेतां पानभूमिं महात्मनः ।
ददर्श कपिशार्दूलस्तस्य रक्षःपतेर्गृहे ॥ ४० ॥
मृगाणां महिषाणां च वराहाणां च सर्वशः ।
तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः ॥ ४१ ॥
रौक्मेषु च विशालेषु भाजनेष्वर्द्धभक्षितान् ।
ददर्श कपिशार्दूलो मयूरान् कुक्कुटांस्तथा ॥ ४२ ॥
वराहवार्ध्रीः सुकृता दधिसौवर्चलायुताः ।
लेह्यमुच्चावचं पेयं फलानि विविधानि च ॥ ४३ ॥
रागषाडवयोगांश्च विविधान् स ददर्श ह ।
शर्करासवमाध्वीकं पुष्पासवफलासवं ॥ ४४ ॥
तथाम्ललवणोपेतैर्गुडेन सह मिश्रितैः ।
संपन्नरूपैर्बहुभिर्मांसैः समुपपादितैः ॥ ४५ ॥
गन्धैश्चूर्णैश्च माल्यैश्च विविधैश्च पृथक् पृथक् ।
संतता शुशुभे भूमिर्भक्ष्यैश्च विविधैस्तथा ॥ ४६ ॥
सोऽपश्यच्छातकुम्भानि शीधोर्मणिमयानि च ।
राजतानि च पूर्णानि भाजनानि महाकपिः ॥ ४७ ॥
हिरण्मयैश्च करकैर्भाजनैः स्फाटिकैरपि ।
जाम्बूनदमयैश्चान्यैः सरकैरपि पूरितैः ॥ ४८ ॥
पानभूमिं तदाकीर्णां ददर्श कपिकुञ्जरः ।
क्वचिदर्द्धावशेषाणि क्वचित् पीतानि सर्वशः ॥ ४९ ॥

क्वचिन्नैव च पीतानि स पानानि व्यलोकयत् ।
क्वचिद्भक्ष्यांश्च विविधान् पानानि च क्वचित् क्वचित् ॥५०॥
फलानि चार्द्धशेषाणि क्वचिन्निःशेषितानि च ।
क्वचित् प्रभिन्नान् करकान् क्वचिदालोडितान् घटान् ।५१।
क्वचित् संयुक्तमाल्यानि फलानि विविधानि च ।
मृदितान्यपविद्धानि गन्धवन्ति तथैव च ॥५२॥
स्रजश्च विविधाश्चित्रा विप्रकीर्णा ददर्श सः ।
चन्दनस्य च दिव्यस्य शीधोश्च मधुरस्य च ॥५३॥
प्रववौ सुरभिर्वायुर्विमाने पुष्पके तथा ।
एवं सर्वमशेषेण रावणान्तःपुरं कपिः ॥५४॥
अन्विष्य महातेजा न चापश्यत् स जानकीं ।
जगामाथ ततश्चिन्तां धर्मशङ्करशङ्कितः ॥५५॥
परदारावरोधस्य सुप्तस्य च निरीक्षणं ।
इदं खलु ममात्यर्थं धर्मलोपो भविष्यति ॥५६॥
न हि मे परदाराणां दृष्टिर्विषयवर्तिनी ।
अयं चात्र मया दृष्टः परदारपरिग्रहः ॥५७॥
तस्य प्रादुरभूच्चिन्ता पुनरेव महात्मनः ।
निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनः ॥५८॥
कामं दृष्टा मया सर्वा विस्तराद्रावणस्त्रियः ।
न च मे मनसः किञ्चिद्वैकृत्यमुपलभ्यते ॥५९॥

मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ।
शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितं ॥ ६० ॥
न चान्यत्र मया शक्या वैदेही परिमार्गितुं ।
स्त्रियो हि स्त्रीषु दृश्यन्ते सदा संपरिमार्गणे ॥ ६१ ॥
यस्य सत्त्वस्य या योनिस्तस्यां तत् परिमृग्यते ।
न शक्या प्रमदा नष्टा मृगीषु परिमार्गितुं ॥ ६२ ॥
तदिदं मार्गितं तावच्छुद्धेनान्तरात्मना ।
रावणान्तःपुरं सर्वं दृश्यते न तु जानकी ॥ ६३ ॥
देवगन्धर्वकन्याश्च नागकन्यास्तथैव च ।
यक्षराक्षसकन्याश्च दृश्यन्ते न तु जानकी ॥ ६४ ॥

ततः स मध्ये भवनस्य मारुतिर्
लतागृहांश्चित्रगृहान् निशागृहान् ।
विचित्य सीतां प्रतिदर्शनोत्सुको
न चैव तामैक्षत चारुदर्शनां ॥ ६५ ॥
स चिन्तयामास महाकपिस्तदा
प्रियामवीक्षमाणो रघुनन्दस्य ।
ध्रुवं न सीता ध्रियते यतो हि मे
विचिन्वतो दर्शनमेति नैव सा ॥ ६६ ॥
सा राक्षसानां प्रवरेण चाबला
स्वशीलसंरक्षणतत्परा सती ।

अनेन नूनं प्रतिरौद्रकर्मणा
कृता भवेदार्यपथे व्यवस्थिता ॥ ६७ ॥
विरूपरूपा विकृता विवर्चसो
महानना दीर्घविरूपदर्शनाः ।
समीक्ष्य सा राक्षसराजयोषितो
भयाद्विपन्ना जनकात्मजाथवा ॥ ६८ ॥
सीतामदृष्ट्वा ह्यनवाप्य पौरुषं
विहृत्य कालं सह बान्धवैश्चिरं ।
न मेऽस्ति सुग्रीवसमीपगा गतिः
सुतीक्ष्णदण्डो बलवान् हि वानरः ॥ ६९ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे अन्तःपुरदर्शनं
नाम चतुर्दशः सर्गः ॥

XV.

दृष्टमन्तःपुरं सर्वं दृष्टा रावणयोषितः ।
न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ १ ॥
किन्नु मां वानराः सर्वे गतं वक्ष्यन्ति शुष्मिणः ।
गत्वा तत्र त्वया वीर कृतं किं तद्विवक्षितं ॥ २ ॥
अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजां ।
किन्नु वक्ष्यत्यसौ वृद्धो जाम्बवानङ्गदश्च सः ॥ ३ ॥
गतं पारं समुद्रस्य लङ्घनं व्यर्थकं मम ।
पुनः प्रायमुपैष्यन्ति नूनं हि गतिरीदृशी ॥ ४ ॥
अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखं ।
अनिर्वेदो हि सततं सर्वार्थेष्वनुवर्तते ॥ ५ ॥
करोति सफलं जन्तोर्जीवितं ह्यन्त्यजेष्वपि ।
तस्मादनिर्वेदकरं यत्नं कर्तास्म्यनुत्तमं ॥ ६ ॥
भूयस्तावद्विचेष्यामि न यत्र विचयः कृतः ।
इति कृत्वा मतिं तत्र हनूमान् मारुतात्मजः ॥ ७ ॥
आपानशाला विविधास्तथा पुष्पगृहाणि च ।
चित्रशालाश्च विविधा भूयः क्रीडागृहाणि च ॥ ८ ॥
निष्कुटान्तररथ्याश्च विमानानि च सर्वशः ।
उत्पतन् निपतंश्चापि तिष्ठन् गच्छन् पुनः क्वचित् ॥ ९ ॥

द्वाराणि समुपावृण्वन् कपाटान्यवघट्टयन् ।
प्रविशन् निष्पतंश्चैव उत्पतन् निपतन्नपि ॥१०॥
स कपिः शीघ्रसंचारी प्रभञ्जन इवापरः ।
चतुरङ्गुलमात्रः सन् परिबभ्राम वानरः ॥११॥
न हि यत्रागतिस्तस्य सोऽवकाशो न विद्यते ।
रावणान्तःपुरे तस्मिन् न किञ्चिन्न चचार सः ॥१२॥
प्राकारान्तररथ्याश्च वेदिकाश्चैत्यसंश्रयाः ।
श्वभ्राणि पुष्करिण्यश्च समस्तास्तेन वीक्षिताः ॥१३॥
राक्षस्यो विविधाकाराः सुरूपा विकृतास्तथा ।
दृष्टा हनुमता तत्र न त्वेव जनकात्मजा ॥१४॥
रूपेणाप्रतिमा लोके श्रेष्ठा विद्याधरस्त्रियः ।
दृष्टा हनुमता तत्र न सा जनकनन्दिनी ॥१५॥
प्रमथ्य राक्षसेन्द्रेण देवकन्या बलाद्धृताः ।
दृष्टा हनूमता तत्र न सा दशरथस्नुषा ॥१६॥
अपश्यंस्तां महाबाहुः पश्यन्नन्या वरस्त्रियः ।
विषसाद तदा तत्र हनूमान् मारुतात्मजः ॥१७॥
अवतीर्य विमानाच्च चिन्तयामास दुःखितः ।
प्रकाशमिह न स्थातुं शक्यते राक्षसालये ॥१८॥
राजा हि रावणः क्रूर इति संचिन्त्य बुद्धिमान् ।
परिक्रम्य ततो दीनः पुनर्ध्यानमुपागमत् ॥१९॥

ततो लङ्कां प्रयत्नेन विचित्य पवनात्मजः ।
रजन्यामर्द्धशेषायां प्राकारे निषसाद सः ॥ २० ॥
निराशो मोघसंकल्पश्चिन्तयन् विविधा गतीः ।
विक्रान्तः सागरं क्रान्तो मग्नश्चिन्तामहार्णवे ॥ २१ ॥
स त्वक्लिष्टेन मनसा प्राकारस्थो महाकपिः ।
अपश्यन् जानकीं सीतां विललाप सुदुःखितः ॥ २२ ॥
यत्कृते वानराः सर्वे विक्षिप्ताः सर्वतो दिशः ।
वयं चाप्रतिमं तीर्णाः सागरं मकरालयं ॥ २३ ॥
तां न पश्यामि वैदेहीं धर्मज्ञां धर्मदर्शिनीं ।
सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियां ॥ २४ ॥
न सन्ति भुवि शैला वा सरितः काननानि वा ।
येष्वार्या न प्रयत्नेन मार्गिता चरता मया ॥ २५ ॥
इह सम्पातिना सीता रावणस्य निवेशने ।
आख्याता गृध्रराजेन न च पश्यामि मैथिलीं ॥ २६ ॥
क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः ।
प्रच्युता रावणस्याङ्कादन्तरा पतिता भुवि ॥ २७ ॥
तस्या वा ह्रियमाणायाः पथि सिद्धनिषेविते ।
शङ्के हृदयमार्यायाः स्फुटितं प्रेक्ष्य रावणं ॥ २८ ॥
रावणस्योरुवेगेन भुजयोः पीडनेन च ।
तया मन्ये विशालाक्ष्या जीवितं त्यक्तमार्यया ॥ २९ ॥

उपर्युपरि वा नूनं सागरं क्रमतस्तदा ।
विचेष्टमाना पतिता समुद्रे जानकी ध्रुवं ॥ ३० ॥
अथ क्षुद्रेण वा तेन रक्षन्ती शीलमात्मनः ।
अबन्धुर्भक्षिता सीता रावणेन तपस्विनी ॥ ३१ ॥
अथवा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा ।
अदुष्टा दुष्टचित्ताभिर्भक्षिता जनकात्मजा ॥ ३२ ॥
अथवा चन्द्रसंकाशं वक्त्रमुज्ज्वलकुण्डलं ।
रामस्य चिन्तयन्ती सा पञ्चत्वं कृपणा गता ॥ ३३ ॥
हा राम लक्ष्मणेत्येवं हायोध्या इति चासकृत् ।
विलप्य बहु वैदेही मृतावश्यं तपस्विनी ॥ ३४ ॥
अथवा निहिता मन्ये रावणस्य निवेशने ।
क्वचिल्लालप्यते बाला पञ्जरस्थेव सारिका ॥ ३५ ॥
जनकस्य कुले जाता रामपत्नी यशस्विनी ।
कथमुत्पलपत्राक्षी रावणस्य वशं गता ॥ ३६ ॥
विनष्टा वा प्रनष्टा वा भक्षिता वापि मैथिली ।
रामस्य प्रियभार्यस्य न निवेदयितुं क्षमं ॥ ३७ ॥
निवेद्यमाने दोषः स्यान्नादोषमनिवेदनं ।
कथं नु खलु कर्तव्यं व्यसनं खल्विदं महत् ॥ ३८ ॥
यदि सीतामदृष्ट्वाहं वानरेन्द्रपुरीमितः ।
गमिष्यामि ततः को मे पुरुषार्थो भविष्यति ॥ ३९ ॥

किं मां वक्ष्यति सुग्रीवो हरयो वा समागताः ।
किष्किन्धां समनुप्राप्तौ तौ वा दशरथात्मजौ ॥ ४० ॥
गत्वा तं यदि काकुत्स्थं वक्ष्यामि परमप्रियं ।
न दृष्टा मैथिलीत्येवं तदा त्यक्ष्यति जीवितं ॥ ४१ ॥
परुषं दारुणं क्षुद्रं क्रूरमिन्द्रियतापनं ।
सीतानिमित्तं स श्रुत्वा दुर्वाच्यं न भविष्यति ॥ ४२ ॥
तं तु कृच्छ्रगतं दृष्ट्वा रामं पञ्चत्वमागतं ।
भृशानुरक्तो मेधावी न भविष्यति लक्ष्मणः ॥ ४३ ॥
भरतो मातरश्चैव शत्रुघ्नश्च मरिष्यति ।
यदि गच्छाम्यहं सीतामदृष्ट्वा जनकात्मजां ॥ ४४ ॥
कृत्स्नस्येक्ष्वाकुवंशस्य नाश एव भवेद्ध्रुवं ।
कृतज्ञः सत्यसंधश्च सुग्रीवः प्लवगेश्वरः ॥ ४५ ॥
रामं कृच्छ्रगतं दृष्ट्वा राजा त्यक्ष्यति जीवितं ।
भीममारोपणं व्यक्तं भविष्यति मयि गते ॥ ४६ ॥
दुर्बला व्यथिता दीना रुमा तस्य मरिष्यति ।
पीडिता भर्तृशोकेन भार्या चैव पतिव्रता ॥ ४७ ॥
भर्तृजेन च दुःखेन पीडिता शोककर्षिता ।
पञ्चत्वगमने राज्ञस्तारापि न भविष्यति ॥ ४८ ॥
मातापितृवियोगेन सुग्रीवव्यसनेन च ।
कुमारोऽप्यङ्गदः कस्माद्धारयिष्यति जीवितं ॥ ४९ ॥

सान्त्वेन तु प्रदानेन मानेन च यशस्विना ।
पालिताः कपिराजेन देहं त्यक्ष्यन्ति वानराः ॥५०॥
गिरीणां वनषण्डेषु नदीतीरेषु वा पुनः ।
क्रीडां नानुभविष्यन्ति समेत्य कपिकुञ्जराः ॥५१॥
सपुत्रदाराः सामात्या रामव्यसनमूर्च्छिताः ।
शैलाग्रात् प्रपतिष्यन्ति समेत्य हरिपुङ्गवाः ॥५२॥
घोरं तु वैशसं मन्ये गते मयि भविष्यति ।
इक्ष्वाकुकुलनाशश्च सर्वेषां च वनौकसां ॥५३॥
सोऽहं वै न गमिष्यामि सुग्रीवस्य पुरीमितः ।
एतावन्तं विनाशं हि न द्रष्टुमहमुत्सहे ॥५४॥
सागरानूपदेशे च बहुमूलफलान्विते ।
चितां कृत्वा प्रवेक्ष्यामि समिद्धं जातवेदसं ॥५५॥
प्रविष्टस्य हि मे नूनं स्वदेहं साधयिष्यतः ।
शरीरं भक्षयिष्यन्ति श्वापदाश्च वयांसि च ॥५६॥
इदमत्यसुखं प्राप्य निश्चितं मनसो हि मे ।
अपो वापि प्रवेक्ष्येऽहमदृष्ट्वा जनकात्मजां ॥५७॥
तापसो वा भविष्यामि वृक्षमूलफलाशनः ।
न तु प्रतिगमिष्यामि तामदृष्ट्वा शुभाननां ॥५८॥
इति चिन्तासमापन्नः सीतामनधिगम्य सः ।
ध्यानशोकपरीताङ्गस्तस्थौ च विमनाः कपिः ॥५९॥

XVI.

स तु शोकसमाविष्टः प्राकारस्थो महाकपिः ।
पुष्पिताग्रानथापश्यदेकत्र विविधान् द्रुमान् ॥ १ ॥
सालानशोकानन्यांश्च चम्पकानतिमुक्तकान् ।
ददर्श नागपुष्पांश्च चूतान् कपित्थकानपि ॥ २ ॥
तां तु दृष्ट्वा महाबाहुरशोकवनिकां शुभां ।
चिन्तयामास मेधावी हनूमान् मारुतात्मजः ॥ ३ ॥
अशोकवनिका हीयं महती सुमहाद्रुमा ।
इमामपि विचेष्यामि न ह्येषा विचिता मया ॥ ४ ॥
अथ धैर्यं समालम्ब्य प्रमृज्याश्रूणि वानरः ।
ज्यामुक्त इव नाराचः पुप्लुवेऽशोकवाटिकां ॥ ५ ॥
स गत्वा वेगवान् वेगाद्बलवान् मारुतात्मजः ।
ततः पादपसंकीर्णां लताशतसमावृतां ॥ ६ ॥
अशोकवनिकां स्फीतां प्रविवेश महाकपिः ।
स प्रविश्य विचित्रां तां विहगैरुपशोभितां ॥ ७ ॥
राजतैः काञ्चनैश्चैव पादपैरनुसंततां ।
विहगैर्मृगसंघैश्च विचित्रां चित्रकाननां ॥ ८ ॥
अचिरोदितसूर्याभामपश्यन्मारुतात्मजः ।
कोकिलैर्भृङ्गराजैश्च मत्तैर्नित्यनिषेवितां ॥ ९ ॥

वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः ।
प्रहृष्टमुदिते काले मृगपक्षिनिषेविते ॥ १० ॥
मत्तबर्हिणचक्राङ्गे वसन्ते कामदीपने ।
मार्गमाणो वरारोहां राजपुत्रीमनिन्दितां ॥ ११ ॥
सुखप्रसुप्तान् विहगान् बोधयामास वानरः ।
उत्पतद्भिर्द्विजगणैः पक्षवातसमुद्धताः ॥ १२ ॥
अनेकवर्णास्तरुभिर्विमुक्ताः पुष्पवृष्टयः ।
तत्रावकीर्णः शुशुभे हनुमान् मारुतात्मजः ॥ १३ ॥
अशोकवनिकामध्ये यथा पुष्पमयो गिरिः ।
दिशः सर्वा विधावन्तं वृक्षषण्डगतं कपिं ॥ १४ ॥
दृष्ट्वा भूतानि सर्वाणि वसन्तमिव मेनिरे ।
द्रुमेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः ॥ १५ ॥
रराज वसुधा तत्र प्रमदेव विभूषिता ।
तरस्विना तरुगणास्तरसा संप्रकम्पिताः ॥ १६ ॥
पुष्पवृष्टिमवर्षन्त विचित्रां कपिना धुताः ।
निर्धूतपर्णशिखराः कीर्णपुष्पफलद्रुमाः ॥ १७ ॥
विक्षिप्तवस्त्राभरणा धूर्त्ता इव पराजिताः ।
हनुमता वेगवता कम्पितास्ते नगोत्तमाः ॥ १८ ॥
पर्णपुष्पफलान्याशु मुमुचुः फलशालिनः ।
विहङ्गसङ्घहीनाश्च फलपुष्पविनाकृताः ॥ १९ ॥

नापुष्यन्त श्रियं वृक्षा निराशा इव निर्धनाः ।
बभूवुरगमाः सर्वे मारुतेन विनिर्धुताः ॥ २० ॥
विधूतवेशा प्रमदा यथा मृदितवर्णका ।
क्रीडनाद्भाति विरता नखदन्ताभिविक्षता ॥ २१ ॥
तथा लाङ्गूलहस्ताभ्यां चरणाभ्यां च मर्दिता ।
बभूवाशोकवनिका भग्नप्रवरपादपा ॥ २२ ॥
स तत्र मणिभूमीश्च काञ्चनीश्च महाकपिः ।
तथा रजतभूमीश्च विचचार समाहितः ॥ २३ ॥
वापीश्च विविधाकाराः पूर्णाः परमवारिणा ।
प्रसन्नसलिलाश्चान्या नलिनीः फुल्लपङ्कजाः ॥ २४ ।
महार्हमणिसोपानैरुपपन्नास्ततस्ततः ।
मणिप्रबालसिकताः स्फाटिकान्तरकुट्टिमाः ॥ २५ ॥
काञ्चनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः ।
फुल्लपद्मोत्पलवतीश्चक्रवाकोपशोभिताः ॥ २६ ॥
मत्तकारण्डवाकीर्णा हंससारसनादिताः ।
दीर्घाभिर्द्रुमयुक्ताभिः सरोभिश्च ततस्ततः ॥ २७ ॥
लताशतैरवततामवतानशतैस्तथा ।
लतागृहवनोपेतां करवीरवनान्तरां ॥ २८ ॥
तामम्बुधरसंकाशैः प्रवृद्धशिखरैः शुभैः ।
विचित्रकूटकूपैश्च पर्वतैरुपशोभितां ॥ २९ ॥

शिलागृहपरिक्षिप्तां नानागृहसमावृतां ।
ददर्श वनमध्यगां नदीं निर्ह्लादिनीं कपिः ॥ ३० ॥
अङ्कादिव समुत्पत्य प्रियस्य कुपितां प्रियां ।
बालपल्लवशाखाग्रां स ददर्श नगोत्तमे ॥ ३१ ॥
क्रीडन्तीं दोलया तुष्टां प्रमदामिव सुन्दरीं ।
पुनरावर्तमानां च ददर्श सरितं कपिः ॥ ३२ ॥
प्रसन्नामिव कान्तस्य कान्तां च पुनरागतां ।
सपद्माश्च नदीस्तत्र नानाद्विजगणायुताः ॥ ३३ ॥
ददर्श हनुमान् वीरो नदद्भिर्विहगैः शुभैः ।
कृत्रिमां च नदीमन्यां पूर्णां शीतेन वारिणा ॥ ३४ ॥
मणिप्रबालसोपानां मुक्तामिश्रितबालुकां ।
प्रासादैः सुमहद्भिश्च सुकृतैर्विश्वकर्मणा ॥ ३५ ॥
काञ्चनैः पर्वतैश्चैव कृत्रिमैरुपशोभितां ।
ये केचित् पादपास्तत्र पुष्पोपगफलोपगाः ॥ ३६ ॥
सुच्छत्रा विविधाकाराः सर्वे सौवर्णवेदिकाः ।
दिव्याभिर्बहुपुष्पाभिर्लताभिरनुवेष्टिताः ॥ ३७ ॥
वीक्षमाणश्च तत्रासौ मार्गमाणश्च मैथिलीं ।
अवेक्षमाणो भूमिं च सर्वतः सोऽन्ववैक्षत ॥ ३८ ॥
सुसंमृष्टेषु देशेषु सुमृष्टमणितोरणां ।
ददर्श विविधाकारां मणिकाञ्चनवेदिकं ॥ ३९ ॥

तथा विचरतस्तस्य तद्वनं पुष्पितद्रुमं ।
मार्गमाणस्य वैदेहीं व्यतीयाय विभावरी ॥ ४० ॥
षडङ्गवेदविदुषां क्रतुप्रवरयाजिनां ।
शुश्राव ब्रह्मघोषं च तूर्यघोषं च मारुतिः ॥ ४१ ॥
मुक्ता विहङ्गाः स्थानानि ययुः पद्मसरांसि वै ।
बोधयित्वा शुभैर्वाक्यैः कामिनीमिव कामुकः ॥ ४२ ॥
सोऽपश्यद्भूमिभागांश्च तत्र प्रस्रवणानि च ।
तथा सुवर्णवृक्षांश्च सौवर्णकुसुमच्छदान् ॥ ४३ ॥
तेषां द्रुमाणां प्रभया मेरोरिव समप्रभः ।
अमन्यत महातेजाः काञ्चनोऽस्मीति मारुतिः ॥ ४४ ॥
तान् काञ्चनांस्तरुगणान् मारुतेन समीरितान् ।
किङ्किणीशतनिर्घोषान् ददर्श पवनात्मजः ॥ ४५ ॥
ततां प्रबालैस्तरुणैः पत्रैश्च बहुभिर्वृतां ।
काञ्चनीं शिंशपामेकां ददर्श महतीं कपिः ॥ ४६ ॥
तेषां काञ्चनवृक्षाणां मध्ये जातं महाद्रुमं ।
प्रवृद्धं शिंशपावृक्षं पुप्लुवे तं महाकपिः ॥ ४७ ॥
आप्लुत्य हनुमान् वीरो ददर्श रुचिरप्रभां ।
वृतां हेममयीभिश्च वेदिकाभिः समन्ततः ॥ ४८ ॥
सुपुष्पिताग्रां रुचिरां तरुणाङ्कुरकोमलां ।
समारुह्य महातेजाः शिंशपां तामचिन्तयत् ॥ ४९ ॥

इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसां ।
इतश्चेतश्च दुःखितां संपतन्तीं यदृच्छया ॥५०॥
निरुद्धां परमोद्विग्नां बाष्पापिहितलोचनां ।
मृगेण हरिणीं हीनां मृगराजवशामिव ॥५१॥
अशोकवनिका हीयं दृढं रम्या दुरात्मनः ।
काञ्चनैरावृता वृक्षैर्बहुभिः सुमनोहरैः ॥५२॥
चम्पकैः सरलैश्चैव शोभिता चन्दनैस्तथा ।
लताभिश्च सुपुष्पाभिर्माल्यैश्च जलजैस्तथा ॥५३॥
इयं च नलिनी रम्या द्विजसंघनिषेविता ।
इह सा राममहिषी नूनमेष्यति जानकी ॥५४॥

एवं तु मत्वा हनुमान् महात्मा
परीक्षमाणो मनुजेन्द्रपत्नीं ।
अवेक्षमाणश्च ददर्श सर्वं
सुपुष्पिते पत्रघने निलीनः ॥५५॥

इत्यार्षे रामायणे सुन्दरकाण्डे प्राकारस्थहनूमच्चिन्ता नाम पञ्चदशः सर्गः — अशोकवनिकाप्रवेशो नाम षोडशः सर्गः ॥

XVII.

परीक्षमाणास्तत्राथ मार्गमाणाश्च जानकीं ।
अपश्यद्भूमिभागांश्च सर्वतः सुसमाहितान् ॥ १ ॥
सुसंमृष्टेषु देशेषु विन्यस्तान् मणिवेदिकान् ।
ददर्श हनुमांस्तत्र मणिकाञ्चनराजतान् ॥ २ ॥
संतानकलताभिश्च पादपाननुवेष्टितान् ।
सृजतः पुष्पवर्षाणि जीमूतानिव वर्षतः ॥ ३ ॥
केशरांश्चाप्यशोकांश्च तथा शाल्मलिकिंशुकान् ।
ज्वलनार्कनिभान् फुल्लान् समन्तादनुशोभिनः ॥ ४ ॥
शातकुम्भप्रभाः केचित् केचिदग्निशिखोपमाः ।
नीलाञ्जननिभाः केचित् तत्राशोकाः समन्ततः ॥ ५ ॥
नन्दनं विविधोद्यानं वनं चैत्ररथं तथा ।
अतिवृद्धमचिन्त्यं च दिव्यं रम्यं श्रिया वृतं ॥ ६ ॥
द्वितीयमिव चाकाशं पुष्पज्योतिर्गणावृतं ।
पुष्परत्नशतैश्चित्रैः पञ्चमं सागरं यथा ॥ ७ ॥
स तन्नन्दनसंकाशं मृगपक्षिनिषेवितं ।
हर्म्यप्रासादसंबाधं कोकिलोत्कूजनादितं ॥ ८ ॥
पुष्पितोत्पलपद्माभिर्वापीभिरुपशोभितं ।
बह्वासनगृहोपेतं बहुभूमिशतैर्वृतं ॥ ९ ॥

लताविताननैर्विविधैः पुष्पैरवनतद्रुमं ।
तथा गुल्मसहस्रैश्च सर्वतः समलंकृतं ॥ १० ॥
दिव्यैः सर्वर्तुकुसुमैः फलवद्भिश्च पादपैः ।
दिव्यगन्धरसस्पर्शैः शोभितं संप्रपुष्पितैः ॥ ११ ॥
पुष्पितानामशोकानां प्रभां सूर्योदयं प्रति ।
प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत ॥ १२ ॥
निष्पत्रशाखाश्च नगाः क्रियमाणा इवापरे ।
निष्पतद्भिश्च शतशश्छिन्नैः पुष्पावतंसकैः ॥ १३ ॥
आमूलात् पुष्पनिचितैरशोकैः शोकनाशनैः ।
पुष्पभारातिभारेण स्पृशद्भिरिव मेदिनीं ॥ १४ ॥
शरलैः कर्णिकारैश्च किंशुकैश्च सुपुष्पितैः ।
स देशो भ्रमरायोगः प्रदीप्त इव लक्ष्यते ॥ १५ ॥
पुन्नगाः सप्तपर्णाश्च चम्पकोद्दालकास्तथा ।
विवृद्धमूलाः शतशः शोभयन्ते सुपुष्पिताः ॥ १६ ॥
सर्वर्तुफुल्लकुसुमैः पादपैर्मधुगन्धिभिः ।
नानाविहगसंघुष्टैर्दिव्यं मृगगणायुतं ॥ १७ ॥
अनेकगन्धप्रवहं पुण्यगन्धिमनोहरं ।
शैलेन्द्रमिव गन्धानामाकरं गन्धमादनं ॥ १८ ॥
तरुणादित्यसंकाशं शोभितं प्रियदर्शनं ।
कोकिलैर्भृङ्गराजैश्च हंसैर्मत्तैश्च सारसैः ॥ १९ ॥

अशोकवनिकायां तु तस्यां वानरपुङ्गवः ।
सोऽपश्यदविदूरस्थं प्रासादं चैत्यमुत्तमं ॥ २० ॥
धृतं स्तम्भसहस्रेण रम्यं कैलासपाण्डरं ।
प्रबालकृतसोपानं तप्तकाञ्चनवेदिकं ॥ २१ ॥
मुष्णन्तमिव चक्षूंषि द्योतयन्तमिव श्रिया ।
विपुलं प्रांशुतायोगादुल्लिखन्तमिवाम्बरं ॥ २२ ॥
स प्रविश्य महाबाहुरशोकवनिकां शुभां ।
ददर्श विकृतास्तत्र राक्षसीः कपिकुञ्जरः ॥ २३ ॥
त्रिकर्णीः शङ्कुकर्णीश्च लम्बकर्णीरकर्णिकाः ।
एकाक्षीश्चैककर्णीश्च कर्णप्रावरणास्तथा ॥ २४ ॥
अतिमात्रोत्तमाङ्गाश्च तनुदीर्घशिरोधराः ।
सुकेशीश्च तथाकेशीः केशकम्बलधारिणीः ॥ २५ ॥
पृथुकर्णललाटाश्च लम्बोदरपयोधराः ।
कराला भग्नवक्राश्च विरूपा विकृताननाः ॥ २६ ॥
दुर्मुखीः कपिलाः कृष्णाः क्रोधनाः कलहप्रियाः ।
कालायसमहाशूलकूटमुद्गरधारिणीः ॥ २७ ॥
वराहनक्रवक्राश्च अशिवाः शिवदर्शनाः ।
ह्रस्वा दीर्घास्तथा कुब्जा विकटा वामनास्तथा ॥ २८ ॥
गजोष्ट्रखरपादीश्च शार्दूलमहिषाननाः ।
हस्त्यश्वखरनागास्या मस्तकोच्छ्रितनासिकाः ॥ २९ ॥

चतुष्पादीर्द्विपादीश्च पृथुपादीस्त्रिपादिकाः ।
अतिमात्रशिरोग्रीवा अतिमात्रपयोधराः ॥ ३० ॥
अतिमात्रास्यनेत्राश्च दीर्घजिह्वानखीस्तथा ।
अजमुखीरश्वमुखीर्गोमुखीः शूकरीमुखीः ॥ ३१ ॥
नरन्तुखरवक्त्राश्च राक्षसीर्भीमविक्रमाः ।
ह्रस्वनासानिनासाश्च तिर्यग्नासा अनासिकाः ॥ ३२ ॥
असिमुद्गरशूलानि दधतीर्मांसभोजनाः ।
मांसशोणितदिग्धाङ्गीर्वसादिग्धकराननाः ॥ ३३ ॥
पिबन्तीः खादमानाश्च नित्यं मांसवसाप्रियाः ।
अनाशिताः सदा पुष्टाः सर्वभक्षाः समुत्थिताः ॥ ३४ ॥
ता दृष्ट्वा वानरो हृष्टो लोमहर्षसमुद्धतः ।
स्कन्धवन्तमुपासीनः परिवार्य वनस्पतिं ॥ ३५ ॥
ताभिः परिवृतां तत्र सग्रहामिव रोहिणीं ।
ददर्श हनुमांस्तत्र लतां कुसुमितामिव ॥ ३६ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे राक्षसीदर्शनं
नाम सप्तदशः सर्गः ॥

XVIII.

मलिनाम्बरसंवीतां राक्षसीभिः सुसंवृतां ।
उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ॥ १ ॥
ध्यानशोकपरां देवीं भर्तृव्यसनकर्षितां ।
ददर्श हनुमान् वीरो बद्धां गजवधूमिव ॥ २ ॥
वृक्षमूले निरानन्दां ददर्श कपिरङ्गनां ।
सीदन्तीं शुक्लपक्षादौ चन्द्ररेखामिवाविलां ॥ ३ ॥
मन्दं प्रख्यायमानेन रूपेणाप्रतिमेन तां ।
पिनद्धां धूमजालेन प्रभामिव विभावसोः ॥ ४ ॥
पीतेनैकेन संवीतां कृष्णेनोत्तरवाससा ।
भुजाभ्यां साधुवृत्ताभ्यां प्रतिच्छन्नकुचोदरीं ॥ ५ ॥
संपन्नामनलङ्कारां स पद्मामिव पद्मिनीं ।
व्रीडितां दुःखसंतप्तां परिम्लानां तपस्विनीं ॥ ६ ॥
ग्रहेण लोहिताङ्गेन रोहिणीमिव पीडितां ।
तां स्मृतिमिव संदिग्धामृद्धिं निपतितामिव ॥ ७ ॥
आशामिव व्यपगतामाज्ञां प्रतिहतामिव ।
अश्रुधौतमुखीं दीनां कृशामनशनेन च ॥ ८ ॥
दुर्बलां दुःखसंतप्तां सुकुमारीं तपस्विनीं ।
निःश्वासबहुलां भीतां पन्नगेन्द्रवधूमिव ॥ ९ ॥

शोकजालेन महता विततेनाभिसंवृतां ।
संछन्नां धूमजालेन शिखामिव विभावसोः ॥ १० ॥
नीलनागाभया वेण्या जघनं गतयैकया ।
भूमौ देवीं तदासीनां नियतां तापसीमिव ॥ ११ ॥
प्रध्यानपरमां बालां रुदन्तीं कुररीमिव ।
प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीजनं ॥ १२ ॥
यूथपेन मृगीं हीनां शार्दूलानुसृतामिव ।
सोपसर्गां यथा सिद्धिं बुद्धिं प्रतिहतामिव ॥ १३ ॥
रामापराधव्यथितां रक्षोहरणकर्षितां ।
चित्रामिव ग्रहग्रस्तां राक्षसीगणरक्षितां ॥ १४ ॥
अबलां मृगशावाक्षीं वीक्षमाणामितस्ततः ।
शोकबाष्पाभिपूर्णेन चारुकृष्णाक्षिपक्ष्मणा ॥ १५ ॥
वदनेनाप्रसन्नेन निश्वसन्तीं मुहुर्मुहुः ।
मलपङ्कधरां दीनां मण्डनार्हाममण्डितां ॥ १६ ॥
प्रभां नक्षत्रराजस्य कालमेघैरिवावृतां ।
तस्य संदिदिहे बुद्धिस्तां दृष्ट्वा तद्विनिर्णये ॥ १७ ॥
अधीतां योगहीनस्य विद्यां प्रतिगतामिव ।
दुःखेन बुबुधे चैनां हनुमान् मारुतात्मजः ॥ १८ ॥
संस्कारेण यथा हीनां वाचमर्थान्तरं गतां ।
तिष्ठन्तीमनलङ्कारां दीप्यमानां स्वतेजसा ॥ १९ ॥

अवशां दुःखसंतप्तां निरानन्दां तपस्विनीं ।
अश्रुपूर्णमुखीं श्रान्तां कृशामनशनेन च ॥ २० ॥
एकवेणीधरां दीनां तापसीवेशधारिणीं ।
सुखार्हां दुःखसंतप्तां व्यसनानामकोविदां ॥ २१ ॥
तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशां ।
तर्कयामास सीतेति कारणैरुपपादयन् ॥ २२ ॥
ह्रियमाणा तदा तेन रक्षसा कामरूपिणा ।
यथा पुरा वै दृष्टा मे तथारूपेयमङ्गना ॥ २३ ॥
पूर्णचन्द्रानना श्यामा चारुवृत्तपयोधरा ।
कुर्वन्ती प्रभया देवी सर्वा वितिमिरा दिशः ॥ २४ ॥
तां नीलकेशीं बिम्बौष्ठीं सुमध्यां सुप्रतिष्ठितां ।
पीनांचितगुरुश्रोणीं वरोरूं संहतस्तनीं ॥ २५ ॥
पद्मपत्रविशालाक्षीं मन्मथस्य रतीमिव ।
इष्टां सर्वस्य जगतः पूर्णचन्द्रनिभामिव ॥ २६ ॥
तां दृष्ट्वा तप्तहेमाभां लोककान्तामिव श्रियं ।
जगाम मनसा रामं मारुतस्यात्मसंभवः ॥ २७ ॥
अस्या हेतोर्विशालाक्ष्या हतो बाली महाबलः ।
रावणप्रतिमो वीर्ये कबन्धश्च निपातितः ॥ २८ ॥
विराधश्च हतः संख्ये राक्षसो भीमविक्रमः ।
तेन विक्रम्य रामेण महेन्द्रेणेव सम्बरः ॥ २९ ॥

चतुर्दशसहस्राणि रक्षसां भीमकर्मणां ।
निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ ३० ॥
खरश्च निहतः संख्ये दूषणश्च महाबलः ।
त्रिशिराश्च महातेजा रामेण विदितात्मना ॥ ३१ ॥
घोरा शूर्पणखा चैव कृत्तकर्णाग्रनासिका ।
ऐश्वर्यं वानराणां च दुर्लभं वालिपालितं ॥ ३२ ॥
तारां रुमां च माल्यां च कपिराज्यं च शाश्वतं ।
अस्या निमित्ते सुग्रीवः प्राप्तवाँल्लोकसत्कृतं ॥ ३३ ॥
सागरश्च मया क्रान्तः श्रीमान् नदनदीपतिः ।
अस्या हेतोर्विशालाक्ष्याः पुरी चेयं निरीक्षिता ॥ ३४ ॥
यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत् ।
अस्याः कृते जगत् सर्वमनुमन्येत केवलं ॥ ३५ ॥
राज्यं वा त्रिषु लोकेषु सीतां वा जनकात्मजां ।
मन्ये लोकास्त्रयोऽप्येते नार्हन्ति जनकात्मजां ॥ ३६ ॥
दुष्करं कुरुते रामो यदिमां मत्तकाशिनीं ।
विना सीतां महाभागां मुहूर्त्तमपि जीवति ॥ ३७ ॥
एवं दृष्ट्वा तदा सीतां हनुमान् मारुतात्मजः ।
जगाम मनसा रामं सीतां च प्रशशंस ह ॥ ३८ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे सीतादर्शनं नाम
अष्टादशः सर्गः ॥

XIX.

प्रशस्य तु प्रशंसत्व्यां सीतां स हरिपुङ्गवः ।
गुणाभिरामं रामं च पुनश्चिन्तापरोऽभवत् ॥ १ ॥
स मुहूर्त्तमिव ध्यात्वा वाष्पपर्याकुलेक्षणः ।
सीतामाश्रित्य तेजस्वी विललाप सुदुःखितः ॥ २ ॥
इयं सा धर्मशीलस्य मैथिलस्य महात्मनः ।
सुता जनकराजस्य सीता भर्तृदृढव्रता ॥ ३ ॥
उत्थिता धरणीं भित्त्वा क्षेत्राद्धलमुखक्षतात् ।
पद्मरेणुनिभैः स्पृष्टा गौरैः केदारपांशुभिः ॥ ४ ॥
विक्रान्तस्यार्यशीलस्य संयुगेष्वनिवर्तिनः ।
स्नुषा दशरथस्यैषा चारित्राढ्या यशस्विनी ॥ ५ ॥
धर्मज्ञस्य कृतज्ञस्य रामस्य विदितात्मनः ।
इयं सा दयिता भार्या राक्षसीवशमागता ॥ ६ ॥
सुखं सर्वं परित्यज्य भर्तृस्नेहबलाद्धृता ।
अचिन्तयित्वा दुःखानि प्रविष्टा निर्जनं वनं ॥ ७ ॥
संतुष्टा फलमूलेन भर्तृशुश्रूषणे रता ।
यां गृहे भजते प्रीतिं वनेऽपि भजते तथा ॥ ८ ॥
सेयं कनकवर्णाभा नित्यं सस्मितभाषिणी ।
सहते यातनां घोरामनाथा मन्दभागिनी ॥ ९ ॥

पीतं कनकवर्णाभमस्यास्तद्वसनोत्तमं ।
उत्तरीयं नगे त्यक्तं दृष्टं मे वानरैः सह ॥ १० ॥
भूषणानि च मुख्यानि दृष्टानि धरणीतले ।
अनयैवापविद्धानि स्वनवन्ति महान्ति च ॥ ११ ॥
सुकृतौ कर्णवेष्टौ च कुण्डले च सुसंस्कृते ।
मणिविद्रुमयुक्तानि हस्तयोर्भूषणानि च ॥ १२ ॥
यानिं चैव विमुक्तानि तथा संस्थानवन्ति च ।
तान्यस्या एव मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ १३ ॥
अनया तु विहीनानि तान्येतानि न संशयः ।
इमां तु शीलसंपन्नां प्रष्टुमिच्छामि मैथिलीं ॥ १४ ॥
रावणेन प्रमथितां प्रपामिव पिपासुना ।
इक्ष्वाकुसरसस्तस्माद्रावणेनोद्धृता बलात् ॥ १५ ॥
मृणाली पङ्कलिप्तेव न विभाति तपस्विनी ।
इयं सा यत्कृते रामश्चतुर्भिः परितप्यते ॥ १६ ॥
कार्पण्येनानृशंस्येन शोकेन मदनेन च ।
स्त्री प्रनष्टेति कार्पण्यमाश्रितेत्यनृशंसता ॥ १७ ॥
पतिव्रतेति शोकेन प्रियेति मदनेन च ।
अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितं ॥ १८ ॥
तेनेयं स च धर्मात्मा ज्ञात्वा कृच्छ्रेण जीवतः ।
इयमिन्दीवरश्यामा रामस्य महिषी प्रिया ॥ १९ ॥

चिरप्रनष्टापि सती हृदयान्न प्रणश्यति ।
पतिशोकेन चाविष्टा तपसा च कृशा भृशं ॥ २० ॥
प्रतिपच्चन्द्रलेखेव दृश्यते द्योतते न च ।
इयं प्रकृत्या तन्वङ्गी तद्वियोगाच्च कर्षिता ॥ २१ ॥
अनभ्यसनशीलस्य विद्येव तनुतां गता ।
नूनमस्याः पुनर्लाभाद्राघवः प्रीतिमेष्यति ॥ २२ ॥
राजा राज्यपरिभ्रष्टः पुनर्लब्ध्वेव मेदिनीं ।
कामभोगविहीनेयं हीना बन्धुजनेन च ॥ २३ ॥
धारयत्यात्मनो देहं तत्समागमकाङ्क्षया ।
राक्षसीर्वीक्षते नैषा नेमान् पुष्पधरान् द्रुमान् ॥ २४ ॥
एकस्थं हृदयं ह्यस्या राममेवानुपश्यति ।
भर्ता नाम परं नार्या भूषणं भूषणैर्विना ॥ २५ ॥
एषा तस्यानुरागेण शोभतेऽप्यनलंकृता ।
दुष्करं कुरुते रामो हीनो यदनया विभुः ॥ २६ ॥
धारयत्यात्मनो देहं न शोकेनावसीदति ।
इमामसितकेशान्तां शतपत्रनिभाननां ॥ २७ ॥
सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथितं मनः ।
कदा नु खलु दुःखस्य पारं यास्यति मैथिली ॥ २८ ॥
राघवस्याप्रमेयस्य लक्ष्मणस्य च जीवतः ।
यदि सीतापि दुःखार्त्ता कालः स दुरतिक्रमः ॥ २९ ॥

रामस्य व्यवसायज्ञा सत्त्वज्ञा लक्ष्मणस्य च ।
नात्यर्थं क्षुभ्यते बाला गङ्गेव जलदागमे ॥ ३० ॥
अस्या देव्या यथा युक्तमङ्गप्रत्यङ्गसौष्ठवं ।
रामस्य हि तथा युक्ता पत्नीयमसितेक्षणा ॥ ३१ ॥
तुल्यरूपवयोयुक्तां तुल्याभिजनलक्षणां ।
राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ॥ ३२ ॥

इयं पुरा पङ्कजसंनिभाक्षी या रक्षिता राघवलक्ष्मणाभ्यां ।
सा राक्षसीभिर्विकृताननाभिः संरक्ष्यते संप्रति वृक्षमूले ॥ ३३ ॥
एवं स तां हेतुभिरनुवीक्ष्य सीतेयमित्येव निविष्टबुद्धिः ।
संलीय तस्मिन् निषसाद वृक्षे बली हरीणामृषभस्तरस्वी ॥ ३४ ॥
इमे च पुष्पावनताः सुशाखाः शोकं भृशं मे जनयन्त्यशोकाः ।
क्षपाव्यपाये त्वथ मन्दरश्मिरभ्युत्थितो दृष्टिहतः शशाङ्कः ॥ ३५ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे हनूमद्विलापो
नाम नवदशः सर्गः ॥

XX.

साचिव्यमिव कुर्वाणः प्रभया निर्मलप्रभः ।
चन्द्रमा रश्मिभिः शीतैः सिषिचे मारुतात्मजं ॥ १ ॥
स ददर्श ततः सीतां पूर्णचन्द्रनिभाननां ।
शोकभारसमाक्रान्तां भारैर्नावमिवाम्भसि ॥ २ ॥
राक्षसीनां स तां मध्ये ददर्श कपिरङ्गनां ।
उदितां शुक्लपक्षादौ चन्द्ररेखामिवामलां ॥ ३ ॥
अथ मङ्गलवादित्रघोषः श्रोत्रमनोहरः ।
बोध्यमाने दशग्रीवे महानासीत् तदाद्भुतः ॥ ४ ॥
स विबुध्य यथाकालं राक्षसेन्द्रो महाबलः ।
स्रस्तमाल्याम्बरः क्षीबो वैदेहीमन्वचिन्तयत् ॥ ५ ॥
भृशं नियुक्तस्तस्यां हि मदनेन मदोत्कटः ।
न शशाकात्मनः काममागतं विनिगूहितुं ॥ ६ ॥
मैथिलीं द्रष्टुकामोऽथ निर्जगाम ततो गृहात् ।
स सर्वाभरणोपेतो बिभ्रन् श्रियमनुत्तमां ॥ ७ ॥
अशोकवनिकामेव प्राविशत् संततद्रुमां ।
तां नगैर्विविधैर्जुष्टां दिव्यपुष्पफलोपगैः ॥ ८ ॥
वृतां पुष्करिणीभिश्च चित्रैश्च बहुभिर्गृहैः ।
सदामत्तैश्च विहगैर्विचित्रैर्मधुरस्वनैः ॥ ९ ॥

समभूमितलां रम्यां दिव्यां चित्रपथद्रुमां ।
वीथीं संप्रेक्षमाणश्च मणिकाञ्चनतोरणां ॥ १० ॥
नानामृगगणैः कीर्णां विहगैश्च सदामदैः ।
चित्रमृगैश्च विविधैर्वृतां दृष्टिमनोहरैः ॥ ११ ॥
क्रीडामृगैश्च विविधैरावृतां सर्वतो दिशं ।
जगाम मदनोन्मत्तो दशग्रीवो महाबलः ॥ १२ ॥
अङ्गनाशतमात्रं तु तं व्रजन्तमुपाव्रजत् ।
कुवेरमिव पौलस्त्यं देवगन्धर्वयोषितः ॥ १३ ॥
काञ्चनोर्दीपिकाश्चित्रा जगृहुस्तत्र योषितः ।
वालव्यजनमन्यास्तु तालवृन्तानि चापराः ॥ १४ ॥
काश्चिद्रत्नमयीः पात्रीः पूर्णाः पानस्य योषितः ।
दक्षिणा दक्षिणैर्हस्तैरादाय जग्मुरङ्गनाः ॥ १५ ॥
ततः काञ्चीनिनादं च नूपुराणां च निःस्वनं ।
शुश्राव परमस्त्रीणां स तदा मारुतात्मजः ॥ १६ ॥
तमप्रतिमकर्माणमचिन्त्यबलपौरुषं ।
द्वारदेशमनुप्राप्तं ददर्श पवनात्मजः ॥ १७ ॥
दीपिकाभिरनेकाभिः समन्तादवभासितं ।
गन्धतैलावसिक्ताभिर्ध्रियमाणाभिरग्रतः ॥ १८ ॥
कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणं ।
सामर्षमिव कन्दर्पमपविद्धशरासनं ॥ १९ ॥

मथितामृतफेनाभमरजोऽम्बरमुत्तमं ।
सपुष्पमिव कर्षन्तं विसृष्टं स्रस्तमग्रतः ॥ २० ॥
स वृक्षविटपे लीनः पुष्पपत्रलतावृतः ।
हनुमानभिगच्छन्तं तमवैक्षत वानरः ॥ २१ ॥
अवेक्षमाणश्च ततो ददर्श कपिरङ्गनाः ।
रूपयौवनसंपन्ना भूषणोत्तमभूषिताः ॥ २२ ॥
ताभिः परिवृतो राजा युवतीभिर्महायशाः ।
तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनं ॥ २३ ॥
क्षीवो विचित्राभरणः शङ्कुकर्णो महाबलः ।
श्मशानचैत्यद्रुमवद्भूषितोऽपि भयंकरः ॥ २४ ॥
तेन विश्रवसः पुत्रः स दृष्टो राक्षसेश्वरः ।
वृतः परमनारीभिस्ताराभिरिव चन्द्रमाः ॥ २५ ॥
तं दृष्ट्वा च महातेजास्तेजोऽनलकरं कपिः ।
राजायं स महाबाहुरिति संचिन्त्य वीर्यवान् ॥ २६ ॥
अवप्लुत्य महाबुद्धिर्दिदृक्षुस्तस्य चेष्टितं ।
पर्णगुल्मवृतामन्यां शाखां गत्वा स्थितोऽभवत् ॥ २७ ॥

इत्यार्षे रामायणे सुन्दरकाण्डे रावणदर्शनं
नाम विंशतितमः सर्गः ॥

XXI.

ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपं ।
प्रावेपत महाभागा कदलीवानिलाहता ॥ १ ॥
प्रच्छाद्योदरमूरुभ्यां बाहुभ्यां च पयोधरौ ।
उपविष्टा वरारोहा रुदती वरवर्णिनी ॥ २ ॥
दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः ।
ददर्श दीनां दुःखार्त्तां मग्नां नावमिवार्णवे ॥ ३ ॥
असंवृतायामासीनां धरण्यां सुदृढव्रतां ।
छिन्नां निपतितां भूमौ लतामिव वनस्पतेः ॥ ४ ॥
मृजाविहीनां दीप्ताङ्गीं मण्डनार्हाममण्डितां ।
सुविशुद्धां रजोध्वस्तां काञ्चनीं प्रतिमामिव ॥ ५ ॥
समीपं राजसिंहस्य रामस्य विदितात्मनः ।
संकल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥ ६ ॥
स्मरन्तीं दयितं चैकं शोकेनोपहतां भृशं ।
दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रतां ॥ ७ ॥
दिव्येनैवाङ्गरागेण द्योतमानामनिन्दितां ।
विचेष्टमानामाविष्टां पन्नगेन्द्रवधूमिव ॥ ८ ॥
धूम्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ।
मृतामिव कुले जातामाचारवति धार्मिके ॥ ९ ॥

पुनः संस्कारमापन्नां जातामिव सुदुष्कुले ।
प्रमादितां कीर्त्तिमिव श्रद्धामिव विमानितां ॥ १० ॥
प्रज्ञामिव परिक्षीणामाशां प्रतिहतामिव ।
देवतामिव विध्वस्तामाज्ञां विनिहतामिव ॥ ११ ॥
पद्मिनीमिव विध्वस्तां हतशूरां चमूमिव ।
प्रभामिव तमोध्वस्तां परिक्षीणामिवापगां ॥ १२ ॥
वेदीमिव परामृष्टां शान्तामग्निशिखामिव ।
निष्प्रभां पतितां भूमौ चन्द्ररेखामिवाम्बरात् ॥ १३ ॥
पौर्णमासीमिव निशां राहुग्रस्तनिशाकरां ।
विध्वस्तपत्रकमलां वित्रासितविहङ्गमां ॥ १४ ॥
हस्तिहस्तपरिक्लिष्टामाकुलां पद्मिनीमिव ।
पतिशोकातुरां दीनां शुष्कस्रोतोनदीमिव ॥ १५ ॥
परया प्रभया हीनां कृष्णपक्षे निशामिव ।
सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचितां ॥ १६ ॥
तप्यमानामिवोष्णेन मृणालीमचिरोद्धृतां ।
गृहीत्वा पालितां स्तम्भे यूथपेन विनाकृतां ॥ १७ ॥
निःश्वसन्तीं सुदुःखार्त्तां गजराजवधूमिव ।
वित्रस्तां छादयन्तीं च गात्रैर्गात्राणि सर्वशः ॥ १८ ॥
नाभिमण्डलगामिन्या प्रसन्नायतमीलया ।
भूषयन्तीं स्वकौ पीनौ रोमराज्या पयोधरौ ॥ १९ ॥